। खिलेषु आख्यानं तेषु मध्ये अपि हरिवंश उक्तभविष्यपर्वहरिवंशान्तर्गतमपि पृथक्प्रदर्शनार्थं ६७ दशश्लोकसहस्राणीति हरिवंशे भविष्ये ग्रंथसंख्या द्वादशसहस्रत्वोक्तिस्तत्त्वानुक्रमत्वहरिवंशे भविष्ये ग्रंथसंख्या द्वादशसहस्रोक्तिस्तत्त्वान
उक्तत्वाद्धरिवंशस्य। आधिक्यस्य ग्रंथस्य दर्शनात्। तावन्मात्रविवक्षायां चलत्सूत्रैः प्रयोगानानाथात्त्वत्रकं सैक्याः संकलने पञ्चवृत्तिः सहस्राणि द्वे शते पञ्चदश च श्लोकाः परिशेषात्तु षट्शताधिकमसहस्राण्यपरिशिष्टग्रंथे कैलास

अष्टादशैवमेतानि पर्वाण्येवं महर्षिणा खिलेषु हरिवंशश्च भविष्यच्च प्रकीर्तितं ६७ दशश्लोकसहस्राणि विंशच्छ्लोकशतानि च। खिलेषु हरिवंशे च संख्यातानि महर्षिणा ६८ एतत्सर्वं समाख्यातं भारते पर्वसंग्रहः अष्टादश समाजग्मुरक्षौहिण्यो युयुत्सया तन्महादारुणं युद्धमहान्यष्टादशाभवत् ६९ यो विद्याच्चतुरो वेदान्सांगोपनिषदो द्विजः न चाख्यानमिदं विद्यान्नैव स स्याद्विचक्षणः ७० अर्थशास्त्रमिदं प्रोक्तं धर्मशास्त्रमिदं महत् कामशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना ७१ श्रुत्वा त्विदमुपाख्यानं श्रव्यमन्यन्न रोचते पुंस्कोकिलगिरं श्रुत्वा रूक्षा ध्वांक्षस्य वागिव ७२

यात्रासहिते किंचिदूनसहस्रचतुष्टयं ज्ञेयं तेन ततोऽप्यधिकं शतत्रयः संक्षेपं ज्ञानवानाथ अनुक्रमणिकाध्यायमित्यादौ भूयः शतानि अध्यायं दृष्टानाधिकं लक्षं पारिशेष्याज्ज्ञेयं। अष्टादशसहस्राणीत्यादयो कीर्तितयायात्
इष्टसंख्या अतिक्लृप्ता ऊहनीया ६८ युयुत्सया योद्धुमिच्छया ६९ अंगानि शिक्षाकल्पादीनि उपनिषदो रहस्यविद्याः तत्सहितान् सांगोपनिषदः विचक्षणः सार्थज्ञः ७० ७१ ॥ ७२ ॥ ध्वांक्षस्य काकस्य ७२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

लोकसंविधयस्थ्यः अध्यात्माधिभूताधिदेवानांसमग्विधयोस्त नाः ७३ विषयेदेशेअंतरित्यर्थः पुराणां अष्टादशभेदंपाद्मादिवत् विधाः जरायुजांडजस्वेदजोद्भिजाः ७४ क्रियाः लौकिकोवैदिकाश्चतासांगुणाः उत्कृष्टफलसाधनानिअथवाक्रियाः दानध्यानादयः गुणाः शमादयाः मनसिइंद्रियाणिवात्रसर्वेशास्त्रार्थः प्रतिष्ठिताइत्यर्थः ७५ ७६ इदंकविभिः उपजीव्यतेएतच्छायाहरणेनैवकाव्यनिर्वाहात् ७६ विशेषणे

इतिहासोत्तमादस्माज्जायंतेकविबुद्धयः पंचभ्यइवभूतेभ्योलोकसंविधयस्त्रयः ७३ अस्याख्यानस्यविषयेपुराणंवर्त्ततेद्विजाः अंतरिक्षस्यविषयेप्रजाइवचतुर्विधाः ७४ क्रियागुणानांसर्वेषामिदमाख्यानमाश्रयः इंद्रियाणांसमस्तानांचित्राइवमनः क्रियाः अनाश्रित्यैतदाख्यानंकथाभुविनविद्यते आहारमनपाश्रित्यशरीरस्येवधारणं ७६ इदंकविवरैः सर्वैराख्यानमुपजीव्यते उदयप्रेप्सुभिर्भृत्यैरभिजातइवेश्वरः ७७ अस्यकाव्यस्यकवयोनसमर्थाविशेषणे साधोरिवगृहस्थस्यशेषास्त्रयइवाश्रमाः ७८ धर्मेमतिर्भवतुवः सततोत्थितानांसह्येकएवपरलोकगतस्यबंधुः अर्थास्त्रियश्चनिपुणैरपिसेव्यमानानैवाप्तभावमुपयांतिनचस्थिरत्वं ७९ ॥ ॥ ॥ ॥ ॥ ॥ ७

अतिशयकरणेअनेनग्रंथस्यसर्वोत्कृष्टत्वमुक्तं ७८ भारतसंप्रदायप्रवर्त्तकानत्राशिषाः भिनंदतिधर्मइति ७९ ॥ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ग्राम

श्रोतव्यमित्याह द्वैपायनेति । अप्रमेयं नास्ति प्रकृष्टं मेयं प्रमेयं यस्मादिदम् अप्रमेयं । अत एव पुण्यमित्यर्थः । पुण्यं पुण्यहेतुः । पवित्रं पवित्रीकर्तृ तुल्यो मृत्युर्न तस्मात्त्रायत इति पवित्रं मृत्युतरणमित्यर्थः । यस्मात्
पापहरं । पुण्यहेतुत्वादेव शिवं कल्याणं । समधिगच्छति शब्दतोऽर्थतश्च जानाति । संध्यायां प्रसंगतः प्रयोगे । द्वितीयायामाख्याय पठित्वा प्रमुच्यते तस्मात्पापादिति शेषः । पद्या । प्रमेयं प्राशयस्य गंभीरत्वाद्गाधं । ७

द्वैपायनौष्ठपुटनिःसृतमप्रमेयं पुण्यं पवित्रमथ पापहरं शिवं च । यो भारतं समधिगच्छति वाच्यमानं किं तस्य पुष्करजलैरभिषेचनेन ॥ ८० ॥
यदह्ना कुरुते पापं ब्राह्मणस्त्विन्द्रियैश्चरन् । महाभारतमाख्याय संध्यां मुच्यति पश्चिमां ॥ ८१ ॥ यद्रात्रौ कुरुते पापं कर्मणा मनसा गिरा । महाभारतमाख्याय पूर्वां संध्यां प्रमुच्यते ॥ ८२ ॥ यो गोशतं कनकशृंगमयं ददाति विप्राय वेदविदुषे च बहुश्रुताय ।
पुण्यं च भारतकथां शृणुयाच्च नित्यं तुल्यं फलं भवति तस्य च तस्य चैव ॥ ८३ ॥ ✿ ॥ ✿ ॥ ✿ ॥ ७

स्वर्ग्यं ज्योतिष्टोमादिवत्स्वर्ग्यं । पवित्रं संध्योपासनादिवच्चित्तशुद्धिकरं । पापहरं प्रायश्चित्तवच्छुद्धिकरं । पापहरं प्रायश्चित्तं पद्मस्नानादिदोषघ्नं । शिवं योगाभ्यासवत्सर्वकल्याणप्रदं सुखदं वा इति । तीर्थं पुष्करं यत्र गयं वा तद्भवा
हृतजलैः । एतच्छ्रवणवतः तीर्थफलं स्नानानुपफलं वा नायासेन सिद्धं भवतीति भावः ॥ ८३ ॥ ॥ श्रीकृष्णायनमः ॥ ॥ श्रीरामचंद्रायनमः ॥ ॥ श्रीजगन्नाथायनमः ॥ ॥

प्र

आख्यानमिति इदं आख्यानं पर्वसंग्रहेण कृतेन नरत्वावगाहं सत्वग्राह्यं भवतीति शेषः। हिमाप्यंर त्निपारे द्वीशग्राह्यौ माप्यौ माप्यान्दनपेतौ प्रस्मिन्नत हिमाप्यं। अनेन हाप्यां संक्षेप विस्तराभ्यां कृतेन पर्वसंग्रहेण शत पर्वाण्यष्टादशपर्वरूपेण माप्यं एतच्छुवाणेन कृत्स्नं ग्रंथार्थावधारणादिति व्याचख्युः तत्र पर्वसंग्रहः वारु विशोकाख्याकादिन वदादियं ददाच्छ्रुत्वा विनिवर्तमायपाद्विपतेः आदिस्थान १८ सभाधनं १७ वनवपं १६ वैराटम् ४ द्योगपुक् ११ भीष्मद्रोणाम ५ जं ८ चकराकि। १ तथाशस्येम ५ सौप्तुंग ३ म स्त्रीशं ५ शांतिम ४ दानधर्मकु १ हयेज्मार २ श्रमावासगं ३ कं १ वं १ मौशलयानपो द्युगतिकं १ वंशेग ३ मेतच्छुतं ४ आदिपर्वणि एकोनविंशतिः पर्वाणीत्यर्थः एवमग्रेपि। भीष्मे मपंच द्रोणेजं ८ हयेज्मा आश्वमेधिकेण २ यानं महाप्रस्थानिकं। द्युगतिः स्वर्गारोहणं

आख्यानतदिदमनुत्तमं महार्थं विज्ञेयं महदिह पर्वसंग्रहेण। श्रुत्वादौ भवति नृणां सदावगाहं विस्तीर्णं लवणजलं यथाप्लवेन ३२४ इति श्रीमहाभारते आदिपर्वणि संग्रहः समासहितोध्यायः ४ ॥ ॥ ॥

नि २

वंशो हरिवंशेणतच्छतं पर्वाणामिति शेषः शेषं स्पष्टं श्लोकसंख्यापि प्राक्कैव ज्ञेया अथ सर्वपर्वतात्पर्यसंग्रहः आरौ सवैद्व्योः कुलनष्टतिग्रहस्मन्नीर्थ सेवोत्थ धर्मः सेयानीत्वाय हसाप्रभु वरस्मिन जः शोकदोर्थो हस क्तः एकस्मिन्कामसोहा वसरत्वमयम्बौ यह समुत्कौ वदीज्ञाना पावे गपहाने स्वापि विलक्षुन्तु स्वभक्तिः। विलेषु दर्दिर्दोनं ताय: कृच्छ्रदिकं नय आश्रमवासे उक्त इति सर्वेत्रानपक्ष्यते। हानं सागः स्व: स्वर्गान्तिपिकमसक्तैभवतीत्यर्थः यः सर्गपाति मविंशतनंदरचि घोनिविश्कातकं विदपंजहमान्तु तंनुपटवस्ता शेणविहूज्ञवत। सत्याशेमतुभेदपूर्वचरितैर्वैराग्ययोगोदिश भोः पंचांगपुराणकल्परमलं व्यासस्वहृद्वहिमे ३२४ इति संग्रहाध्यायार्थप्रकाशः ॥ ॥ ॥ ॥ ॥ ॥ ॥

जनमेजयस्य सर्पसत्रे कथेयं प्रसङ्गेन स्फुटं तदुपोद्घातत्वेन जनमेजयस्य सरमाशापादिकमाह जनमेजयः पारीक्षित इत्यादिना दीर्घसत्रं बहुवार्षिकसत्रं उपास्ते आगतवानिति सारमेयः श्वा १ रोरूयमाणः भृशं रुदन् २ नावेक्षे हवींषि अमेध्यत्वाणामपि न ईक्षे तत्रावलेहनं दूरतो पास्तमित्यर्थः क्रुद्धः पुत्रकृते तेन श्वा अहमस्माकं प्रहृष्यते इति अवेक्षणादि श्वनाहं इममपि हविर्दूष्यतीत्यपराद्धः ६ ८ सा तानुवा

सौतिरुवाच जनमेजयः पारीक्षितः सह भ्रातृभिः कुरुक्षेत्रे दीर्घसत्रमुपास्ते तस्य भ्रातरस्त्रयः श्रुतसेन उग्रसेनो भीमसेन इति तेषु तत्सत्रमुपासीनेष्वागच्छत्सारमेयः १ स जनमेजयस्य भ्रातृभिरभिहतो रोरूयमाणो मातुः समीपमुपागच्छत २ तं माता रोरूयमाणमुवाच किं रोदिषि केनास्यभिहित इति ३ स एवमुक्तो मातरं प्रत्युवाच जनमेजयस्य भ्रातृभिरभिहतोऽस्मीति ४ तं माता प्रत्युवाच व्यक्तं त्वया तत्रापराद्धं येनास्यभिहत इति ५ स तां पुनरुवाच नापराध्यामि किंचिन्नावेक्षे हवींषि नावलिहे इति ६ तच्छ्रुत्वा तस्य माता सरमा पुत्रदुःखार्ता तत्सत्रमुपागच्छद्यत्र स जनमेजयः सह भ्रातृभिर्दीर्घसत्रमुपास्ते ७ स तया क्रुद्धया तत्रोक्तोऽयं मे पुत्रो न किंचिदपराध्यति नावेक्षते हवींषि नावलेढि किमर्थमभिहत इति ८ न किंचिदुक्तवन्तस्ते सा तानुवाच यस्मादयमभिहितोऽनपकारी तस्माददृष्टं त्वां भयमागमिष्यतीति ९ जनमेजय एवमुक्तो देवशुन्या सरमया भृशं संभ्रान्तो विषण्णश्चासीत १० स तस्मिन्सत्रे समाप्ते हास्तिनपुरं प्रत्येत्य पुरोहितमनुरूपमन्विष्यमाणः परं यत्नमकरोत् यो मे पापकृत्यां शमयेदिति ११ ॥ ॥ ॥ ॥ ॥

च सा पुनीतान मिलन्तु जनमेजयं प्रत्युवाचेत्यर्थः अदृष्टं अतर्कितं ९ संभ्रान्तोऽसंतुष्टः भीतः विषण्णः व्याकुलः कार्याकार्यविकलः एतेन निरपराधिनां हिंसा हिंसकस्य सद्योदुःखावहेति दर्शितं १० पापकृत्यां शापदूषणां बलायुःप्राणनिकृन्तनादेव तां शमयेत् तत्र क्रोधनां कुर्यात् ११ ॥ ॥ ॥ ॥ ॥

सर्प्यां सर्पजातीयायां जातत्वात् हि विचित्रोत्पन्नत्वाद् लौकिकशङ्काभावाच्चेति भावः १६ १७ उपांशुव्रतं निगूढव्रतनियमः १८ उपावृत्तः स्वदेशं प्रत्यागतः तक्षशिलां देशविशेषं। विजेतुमिति शेषः २०
स एवं गुरुप्रसादादयेन भयो विजयी उत्तङ्केन प्रोत्साहितः सर्पसत्रं कृतवानिति वक्तुं तद्गुरोर्वेदस्य प्रशंसाप्रसंगादितरव्यपि तत्सहाध्यायिनो आरुणप्रभृतयस्तत्प्रसंगतो ऽनि। तेन च गुरुभक्तिमाहात्म्यमत्र प्रख्या

सो॰१

स कदाचिन्मृगयां गतः पारीक्षितो जनमेजयः कस्मिंश्चित्स्वविषये आश्रममपश्यत १२ तत्र कश्चिदृषिरासांचक्रे श्रुतश्रवा नाम तस्याभिमतः पुत्र आस्ते सोमश्रवा नाम १३ तस्य तं पुत्रमभिगम्य जनमेजयः पारीक्षितः पौरोहित्याय वव्रे १४ स नमस्कृत्य तमृषिमुवाच भगवन्नयं तव पुत्रो मम पुरोहितोऽस्त्विति १५ स एवमुक्तः प्रत्युवाच जनमेजयं पुत्रोऽयं मम सर्प्यां जातो महातपस्वी स्वाध्यायसंपन्नो मत्तपोवीर्यसंभृतो मच्छुक्रं पीतवत्यास्तस्याः कुक्षौ जातः १६ समर्थोऽयं भवतः सर्वाः पापकृत्याः शमयितुमन्तरेण महादेवकृत्याम् १७ अस्य त्वेकमुपांशुव्रतं यदेनं कश्चिद्ब्राह्मणः कंचिदर्थमभियाचेत्तस्मै दद्यादयं यद्येतदुत्सहसे ततो नयस्वैनमिति १८ तेनैवमुक्तो जनमेजयस्तं प्रत्युवाच भगवंस्तत्तथा भविष्यतीति १९ स तं पुरोहितमुपादायोपावृत्तो भ्रातॄनुवाच मयायं वृत उपाध्यायो यदयं ब्रूयात्तत्कार्यमविचारयद्भिरिति। तेनैवमुक्ता भ्रातरस्तस्य तथा चक्रुः स तथा भ्रातॄन्संदिश्य तक्षशिलां प्रत्यभिप्रतस्थे तं च देशं वशे स्थापयामास २० एतस्मिन्नन्तरे कश्चिदृषिर्धौम्यो नामायोदस्तस्य शिष्यास्त्रयो बभूवुः २१ ॥ ॥ ॥ ॥ ॥ ॥ ॥

प्रसंगेनाह। धौम्येनामतः आयोदः स आयोदः भक्तः तस्यापत्यं आयोदः आयोद इति पाठे [illegible] आयोदः लोहदन्तः दष्टदन्त सामासेनोद्दः उपाध्यायस्य नेकार्थ्यायसादं ता इति वाक्यशेषान्न कृ
स्वचाऽऽसर्थः २१ श्रीरामायनमः ॥ ॥ ॥ ॥ ॥ ॥

केदारेमहाक्षेत्रांतर्गतं चतुरस्त्रं वप्रखंडः जलनिरोधभित्तिर्बंधस्तां बधान व्रीहिकेदारे बहुजलप्रवेशेन वीजनाशो माभूदिति भावः २२ नाशकत शिष्यपरीक्षार्थं गुरुणा योगबलेन जलप्रवाहस्तु वरिल
संपादनादि सर्वः २३ उत अर्धं द्वारपतीसुदारकः रलयोरभेदादुद्दालक इति निरुक्तिरेकेन २५ श्रेयः ऐहिकामुष्मीकसारवमपवर्गश्च सर्वे वेदचेति विनाप्यध्ययनं एकाग्रेण गुरुमाराधयता सर्वाविद्या लभ्यत इति

ध्य

उपमन्युरारुणिर्वेदश्चेति: स एकं शिष्यमारुणिं पांचाल्यं प्रेषयामास गच्छ केदारखंडं बधानेति २१ स उपाध्यायेन संदिष्ट आरुणिः पांचाल्यस्तत्र गत्वा तत्के [गु१]
दारखंडं बद्धुं नाशकत् स क्लिश्यमानोऽपश्यदुपायं भवत्वेवं करिष्यामीति २३ स तत्र संविवेश केदारखंडे शयाने च तथा तस्मिंस्तदुदकं तस्थौ २४ ततः
कदाचिदुपाध्याय आयोदो धौम्यः शिष्यानपृच्छत् क्व आरुणिः पांचाल्यो गत इति २५ ते तं प्रत्यूचुर्भगवतैव प्रेषितो गच्छ केदारखंडं बधानेति स एवमु
क्तस्तान् शिष्यान्प्रत्युवाच तस्मात्तत्र सर्वे गच्छामो यत्र स गत इति २६ स तत्र गत्वा तस्याह्वानाय शब्दं चकार भो आरुणे पांचाल्य क्वासि वत्सैहीति २७ स तच्छ्रुत्वा
आरुणिरुपाध्यायवाक्यं श्रुत्वा तस्मात्केदारखंडात्सहसोत्थाय तमुपाध्यायमुपतस्थे २७ प्रोवाच चैनमयमस्म्यत्र केदारखंडे निःसरमाणमुदकमवारणी
यं संरोद्धुं संविष्टो भगवच्छब्दं श्रुत्वैव सहसा विदार्य केदारखंडेनिःसरमाणमुदकमवारणीयं संरोद्धुं संविष्टो भगवच्छब्दं श्रुत्वैव सहसा विदार्य केदारखंडं भवंतमुपस्थितः
२९ तदभिवादये भगवंतमाज्ञापयतु भवान्कमर्थं करवाणीति ३० स एवमुक्त उपाध्यायः प्रत्युवाच यस्माद्भवान्केदारखंडं विदार्योत्थितः तस्मादुद्दा
लक एव नाम्ना भवान्भविष्यतीत्युपाध्यायेनानुगृहीतः ३१ यस्माच्च त्वया मद्वचनमनुष्ठितं तस्माच्छ्रेयोऽवाप्स्यसि सर्वे च ते वेदाः प्रतिभास्यंति सर्वाणि च धर्म
शास्त्राणीति ३२ स एवमुक्त उपाध्यायेनेष्टं देशं जगाम अथापरः शिष्यस्तस्यैवायोदधौम्यस्योपमन्युर्नाम ३३ तं चोपाध्यायः प्रेषयामास वत्सोप
मन्यो गा रक्षस्वेति ३४ स उपाध्यायवचनादरक्षद्गाः स चाहनि गा रक्षित्वा दिवसक्षये गुरुगृहमागम्योपाध्यायस्याग्रतः स्थित्वा नमश्चक्रे ३५ ॥

भावः ३२ ३३ ३४ ३५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

पीवानेपूर्वंभ्रयोन्यादिसंपीतवंतमिसर्थः वृत्तिंजीविकां ३६ ४१ वृत्त्युपरोधोवृत्तिप्रतिबंधः ४२ चरसिभक्षयसि ४३ ४४ उपयोक्तुंभोक्तुं ४५ ४६ ४७ ४८

तमुपाध्यायः पीवानमपश्यदुवाचचैनंवत्सोपमन्योकेनवृत्तिंकल्पयसिपीवानसिदृढमिति ३६ सउपाध्यायंप्रत्युवाचभोभैक्षेणवृत्तिंकल्पयामीतितमुपा
ध्यायः प्रत्युवाच ३७ मय्यनिवेद्यभैक्षंनोपयोक्तव्यमितिसतथेत्युक्त्वाभैक्षंचरित्वोपाध्यायायन्यवेदयत् ३८ सतस्मादुपाध्यायः सर्वमेवभैक्षमगृह्णात्सत
थेत्युक्तः पुनरारक्षद्गाः अहनिरक्षित्वानिशामुखेगुरुकुलमागम्यगुरोरग्रतः स्थित्वानमश्चक्रे ३९ तमुपाध्यायस्तथापिपीवानमेवदृष्ट्वोवाच वत्सोपम
न्योसर्वमशेषतस्तेभैक्षंगृह्णामिकेनेदानींवृत्तिंकल्पयसीति ४० सएवमुक्तः उपाध्यायंप्रत्युवाच भगवतेनिवेद्यपूर्वमपरंचरामितेनवृत्तिंकल्पयामीति
तमुपाध्यायः प्रत्युवाच ४१ नैषान्याय्यागुरुवृत्तिरन्येषामपिभैक्ष्योपजीविनांवृत्त्युपरोधंकरोषिइत्थंवर्त्तमानोलुब्धोसीति ४२ सतथेत्युक्त्वागाअरक्षत्
रक्षित्वाचपुनरुपाध्यायगृहमागम्योपाध्यायस्याग्रतः स्थित्वानमश्चक्रे ४३ तमुपाध्यायस्तथापिपीवानमेवदृष्ट्वापुनरुवाच वत्सोपमन्योअहंतेसर्वंभैक्षं
गृह्णामिनचान्यच्चरसि पीवानसिभृशंकेनवृत्तिंकल्पयसीति ४४ सएवमुक्तस्तमुपाध्यायंप्रत्युवाच भोएतासांगवांपयसावृत्तिंकल्पयामीति तमुवा
चोपाध्यायोनैतन्न्याय्यंपयउपयोक्तुंभवतोमयानभ्यनुज्ञातमिति ४५ सतथेतिप्रतिज्ञायगारक्षित्वापुनरुपाध्यायगृहानेत्यगुरोरग्रतः स्थित्वानमश्च
क्रे ४६ तमुपाध्यायः पीवानमेवदृष्ट्वोवाचवत्सोपमन्योभैक्षंनाश्नासिनचान्यच्चरसि पयोनपिबसिपीवानसिभृशंकेनेदानींवृत्तिंकल्पयसीति ४७
सएवमुक्तउपाध्यायंप्रत्युवाचभोः फेनंपिबामियमिमेवत्सामातॄणांस्तनान्पिबंतउद्गिरंति ४८ तमुपाध्यायः प्रत्युवाचएतेत्वदनुकंपयागुणवंतोव
त्साः प्रभूततरंफेनमुद्गिरंतितदेषामपिवत्सानांवृत्त्युपरोधंकरोष्येवंवर्त्तमानः फेनमपिभवान्नपातुमर्हतीतिसतथेतिप्रतिज्ञायपुनरारक्षद्गाः ४९
मे२

श्रीरामजयरामजयजयराम ॥ ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

५० अर्कपत्राणि अर्कवृक्षपत्राणि क्षारेति अम्लरसपि क्षारादि द्रव्यं च कटुस्वधानकमेवेति भावः तीक्ष्णविपाकैः पाककाले उग्रैः अग्निज्वालोत्पादकैः ५२ ५६ करिष्यत इति स्तुहि तौ त्वां
चक्षुष्मन्तं करिष्यत इत्यर्थः ५६ अश्विनौ ऋग्भिः स्तवितारौ देवानामपि तौ यावत्पठितानाममश्विनौ कर्मसमवेतार्थप्रकाशत्वेन तत्समानार्थत्वं गतानि इदं हाराणि पूर्वकर्मणि मंत्रसकाः प्रभुः तद्गुणगवलेन च
अनंतत्वादीनि ब्रह्मलिंगानि अश्विनोस्तत्संदर्शयामास कर्मणि विनियोगस्यादर्शनात् तत्र ब्रह्मलिंगैरर्थवत्त्वोपपत्तौ लिंगमात्रात्कर्मणः तत्र विनियोगस्य च कल्पनीयत्वात् किंच समा

हितिपोगः पाश्नुद
अंगांगिभावः

तथा प्रतिषिद्धो भैक्षं नाश्नाति न चान्यदाहारयति पयो न पिबति फेनं नोपयुंक्ते ५० स कदाचिदरण्ये क्षुधार्तोऽर्कपत्राण्यभक्षयत् स तैरर्कपत्रैर्भ
क्षितैः क्षारतिक्तकटुरूक्षैः तीक्ष्णविपाकैश्चक्षुष्युपहतोऽन्धो बभूव ५१ ततः सोंधोपि चंक्रम्यमाणः कूपेऽपतत् अथ तस्मिन्ननाग
च्छति सूर्ये चास्ताचलावलंबिनि उपाध्यायः शिष्यानवोचत् मयोपमन्युः सर्वतः प्रतिषिद्धः स नियतं कुपितस्ततो नागच्छति चिरं ततो वे
ष्य इति ५२ एवमुक्त्वा शिष्यैः सार्द्धमरण्यं गत्वा तस्याह्वानाय शब्दं चकार भो उपमन्यो क्व असि वत्सेहीति ५३ स उपाध्यायवचनं श्रुत्वा प्र
त्युवाचोच्चैरयमस्मिन्कूपे पतितोहमिति ५४ तमुपाध्यायः प्रत्युवाच कथमसि कूपे पतित इति। स तं प्रत्युवाच अर्कपत्राणि भक्षयित्वान्धीभू
तोस्म्यतः पतित इति ५५ तमुपाध्यायः प्रत्युवाचाश्विनौ स्तुहि तौ देवभिषजौ त्वां चक्षुष्मंतं करिष्यत इति ५६ स एवमुक्त उपाध्याये
नोपमन्युः स्तोतुं प्रचक्रमे देवावश्विनौ वाग्भिरृग्भिः ५७

मुख्य
रोप्यं स्वरूपेण विषयोस्त्वधानमेवेति विषयस्य तत्स्वरूपेणासमारोप्यं न स्वरूपवदिति न्यायेन पश्चात् आरोपितभुजंगधर्मेण भीषणत्वादिना ऋग्विशिष्यते तत्र ऋग्धर्मेणाभिगम्यत्वादिना भुजंगो विशेष्य
शक्यः तत्स्वरूपलोपः प्रसंगात् एवं ब्रह्माध्यस्ताश्विदेव ॥ ॥ ॥ ॥ ॥

चं ब्रह्म
त:

ब्रह्मा लिंगात्

तावेमेतस्याविग्रहवत्त्वादिनाब्रह्मविशेषिंशकंनतद्ब्रह्मधर्मेण। स्थूलत्वादिनादेवताविशेषिंशकात्स्वरूपलोपप्रसंगात्‌। अतएवाकाशश्रुतिः सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यंत इत्यत्र नमथा। विहु भूतोपादानत्वप्रकाशनसामर्थ्यरूपाल्लिंगात्तद्ब्रह्मपरमपानीता आकाशस्तल्लिंगादिसूत्रस्योपन्यस्ते च उमा उत्तम्‌ इति मंत्रे वितन्वाते धियइंद्रस्य शिवानां तयोर्मित्त्वं धियो। योनः प्रचोदयादित्यनेनैतस्यां ब्रह्म लिंगं। स्पष्टयति मंत्रे जनं भीष्टर्को नेत इति भर्तृत्वं हं तत्वे ब्रह्मलिंगे। जगंरीं भगीरा विसर्यस्तु फरीमहं तामाविवितियास्कीया निर्वचनात्‌। नुचेतात्मप्रतिबाधके संकोच पितं शक्यानि। शाब्दहृष्टिमायेनात्वि विग्रहोपलक्षितब्रह्मोपदेशार्थत्वोपपत्तेः अत्रही द्रोणापरमनिदं नंदतिमामेव विजानीहि। युक्तेर्देवतात्म तएववेधत्वापत्तेर्यच्छाद्दुष्टं ब्रह्म तदभिप्रायेणायमुपदेशो न देवतात्माभिप्रायेणेति स्थितं। आश्विनाविति द्वित्वं तद्धा सुपर्णा सयुजा सखाया समानचितयोरन्यः पिप्पलं स्वाद्वत्तीति मलमनश्नन्नन्यो: अभिपश्यतीत्यत्र इति संख्यामूर्तिप्रकारेण उपाध्युपधेयभूतसत्त्वचैतन्यभेदादिं भिन्ना येन। तेनात्र मायोपाधिकं जगत्कारणं ब्रह्म वर्तियाद्यते तत्त्वानस्यापरमपुरुषार्थत्वात्‌। चक्षुः श्रावित्ततानमेयान्यके चक्रुदानमिति मंत्रे ऽ। शिवनोग्रच्छः प्रदत्वदर्शनादवान्तरफलं। आख्यायिका उग्रहदेवतामन्त्रे विंद्याद्यास्यैत्व स्तूचनार्थमिपक्तमंत्रा मिषत्तोस्याग्रोमीतियामेरवा मिषक्त सुतेर्दैवमिषजाविस्तुक्तं ॥ ५२ ॥ ॥ ॥ ॥

जनमिति स्वजंतनामुचः पठन्ति सर्वगा वितिसर्वगो सृष्टेः प्रागविद्यमानो। सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्मेति श्रुतेः पूर्वो नावेव हिरण्यगर्भात्मकतां गतो। सर्वेशः सर्वमइति श्रुतेः चित्रभानुः
विचित्ररूपं चाकारं भासमानो। एतदात्म्यमिदं सर्वमिति श्रुतेः गिरा स्ववाणीजज्ञानेन वा शब्दार्थे नयता मननध्यानात्मकेन आलोचनेन आशंसा मितपतमासत्वेन प्रायुक्षिष्ठामि। हि यस्मात् अनंतो देशकाल
वस्तुभिरपरिच्छिन्नो। एतेन सत्यस्वादनुक्तमुक्तं। अन्यथा चिंतो वस्तुपरिच्छेदाद्यनंतः यस्मादनंतो तस्मादशंसामभेयाय। ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेस्तज्ज्ञानादहमप्यनंतः स्यामिति भावः अन्यथाद्वितीयाद्वैभ
वं भवतीति श्रुतेः संसारभयानिवृत्तिप्रसंगः दिव्योद्युतिरूपात्स्वचैतन्यरूपेणाद्योतमानो सुपर्णो पक्षिवद्गौ हृत्कारकौ। अधिक्षिपंतो भुवनानि विश्वा। सत्यानविद्धैपशक्त्या सर्वाणि भुवनानि वि

नि १

यः सर्वगो पूर्वजो चित्रभानुः गिरावाशंसामितपसात्यनंतो दिव्यो सुपर्णो विरजो विमानावधिक्षिपंतो भुवनानि विश्वा १ ॥ ॥

क्षिपंतो तदैतत्सत्यं येन स्वप्रपश्यतीति श्रुतेः विश्वा विश्वानि रूपाण्यस्तु तिति हृषोडादेशः विरजो रजः सहितावस्थानावो वा रजः प्रधानं सांख्याभिमतं गुणत्रयं वा तद्रहितो। सत्यो तदनपेक्षा विसर्गः वह्नः स्यांप्र
ज्ञायेयेति तदात्मानं स्वयमकुरुतेति सत्यस्यैव बहुभवनाशंसनकरणाच्च वणात् विमानो विगतंमानं प्रमाणसाधनं यत सत्यो तत्त्सेनाभ्यपिहितं यदासीदिति सत्यस्यातत्स्थत्वात् मानानामीहस्मत्वेन विमानते
। चितत्स्वरूपतो वाचो निवर्तते अप्राप्य मनसा सहेति वाङ्मनसातीतत्वादमानत्वं १ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

स्य सैव तत्त्वमतस्य विवरणार्थोऽत्र श्लोकः । पूर्वं गा विनिमये । एवं कालस्यान्तावती पतेतां निराचष्टे कालस्यैव शिवस्वरूपत्वं वदन् हिरण्मयाविति । हिरण्मयौ शकुनी हिरण्मयः शकुनिर्ब्रह्मनामेति
कं तेरमणीयो ऽसंगौ चेत्यर्थः सांपरायौ सर्वस्मिन्लयाधिष्ठानभूतौ । स्वपंचनामसदस्यौ ऽसत्त्वंरजस्तमोगुणादि दर्शनं उपपक्षयधर्मकं घटादितद्रूपमयाभावरूपौ । सन्नसौ शोभमनना सिकौ विग्रहधर्मो यं । वैनिश्चितं
यंतौ कालेऽगतं देवाह । विवस्वतः सञ्ज्ञोपेयं वर्मौ । विवस्वतं सूर्यं स्वानसदृशा अमितं तत्कृष्णराविज्ञातं । शुक्लं दिनजातं च तं तद्धानौ यंते नभं च न्ना रूपं च स्वयंतौ तं तवाया विवतेन च परेन तरा सावेगेन सवेमौ
सवेमौ सुमार्गौ विजितलोको येन सर्वमाविर्तेरगादिको मनसो देव पितयानौ ऽधिष्ण्यं तौ । शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते इति भगवद्वचनात् । एताभ्यामेव कर्मफलोपभोगाय तत्र तत्र लोकमार्गं प्रति
। कालस्य च ब्रह्मत्वकौ तस्मात्कालाहं तत्कृतिरिति भावः २ एवं ब्रह्माहं तं प्रसाध्य एतद्देवविस्तरेषुणैर्ज्ञातं मन्मुक्तये न्यशार्वं धाप भवति साहय्यता मिति । सुपर्णा स्यपरमात्मनो बलेन कालशक्त्यायता वन्निका

हिरण्मयौ शकुनी सांपरायौ नाम सत्यदर्शौ सनसौ वेत्ययंतौ शुक्लं च यंतौ नाम सवेमावधिष्ण्यं तावमितं विवस्वतः २ सुपर्णा सुपर्णा सवले
नवन्निकाममं चनाम शिवेनो सौभगाय तावत्त्वहंनाव नमेन मायपाव मन्तमायाऽरुणाउदाऽवहन् २ ॥ ॥ ॥

सुपर्णा सरूपांजीवपक्षिणौ आशिवनौ देवौ सौभगाय महते भागपायाममुंचतां मोचितवंतौ । पुनरपुण्यपापविद्भिरित्यर्थः अतिरेकमखेन पुनरपुण्यपापमाह । तावदिति । मायया अज्ञानेन सह वसन्नमाः अतिशये
नवसंतः असंतं मूढाः पुरुषाः अरुणा रागादि विषयाक्रांताः गाः इंद्रियाणि प्रतिअनमंतनतवंतः यावत इंद्रियकैकर्प्य यावदासीदित्यर्थः तावत्त्वहंतौ अनात्मदोषा स्पर्शिनो ऽवांजीवात्मरू
पौ कर्मीभूतौ उदाउदक प्रधानेन शरीरेणाऽप: पुरुषवचमहतिप्रुते: उंद: क्लेदने इस्मात्क्विपि अनिदितामिति नलोपे उदिति रूपं । इत्यौ भावेत्तनी पात्तरूपे ण अवाहन्कुटवंतः एतेन रागादि
यस्ताया वहत्वं तिआत्मानं देहमेवता वन्मन्यं तेन तस्य संसारं तिनसमाद्रागादि जयोऽपुनरपुण्यपापस्त्वक्तं भवति ३ ॥ ॥ ॥ ॥ ॥ ७

कालेहंतं कर्मापि प्रत्युपायरसाहषष्टिश्चेति। धेनवोऽभिमतफलदोग्ध्र्यो गावोऽहोरात्ररूपाः षष्टिश्च त्रिंशत्तासु संख्याताः एकं वत्सं संवत्सरं स्रवन्ति निवर्तयंतीति वत्सं गौणा कर्मभूतं। नानागोत्राः पृथक्फला अपि विहिताः क्रियाः मुख्यकर्मभूताः एकदोहनाः एकमेव त्रिविदिया स्यंदोहनं दुग्धमत इति मुख्यत्वादोक्षे यांते। एककर्तृ ऋत्विक्कारके इति कर्माणि त्सु दुह्यंति। विविदिषंवः विविदिषंतीयज्ञेने सादिश्रु ते। तथा चोक्तं यज्ञेन सादिश्रुते। तथा चोक्तं यज्ञेन तादिवाकं यशतपथविहितं कर्मैतद्दंगहीत्वा सोत्सत्यात्मानमिद्दं ब्रह्मविविदिषामात्रमाध्येयनक्तीति। एकदोहना यं वत्सं दुहंतितं नो पशिवैौ अ शिवनौ गोप्यानीयोऽहहतः अश्विनावेव कालं वत्सरं तेऽस्यार्थः एतद्द्युपवां दिशोजनपथ इस वत्सरः श्रीभविष्यति। कीदृशं वत्सं धर्म नायकं। संहतीरि मितियावत्तदकं उत्निष्टसमात्कार्यज्ञानतउत्सादक
वे

षष्टिश्च गावस्त्रिंशताश्च धेनव एकं वत्सं स्रवते तं दुहंति नानागोत्रा विहिता एकदोहना तावश्विनौ दुहतो धर्ममुक्थ्यं ४ एकोनां नाभिं सप्तश ताश्चराः श्रिताः षधिष्ठमा विंशतिरर्पिता अराः अनेमि चक्रं परिवक्रं परिवर्त्ततेः तदंमा पाश्विनौ समनक्तिवर्षणी॥ ५ ॥ छ

मित्यर्थः ४ एतत्कालचक्रं सर्वान्देवमनुष्यान्क्रिशोतीत्याह एकामिति चक्रस्याक्षांतरमध्यमवा त्यवलयानि नाभिं प्रधिनेमयः तेषां संभेद्काष्ठानितीर्यचिद्धराः एवं सति एकनाभिं संवत्सरव्यांस सशताअराः विंशतिश्चश्चराः तेवाहृष्टशोः हानि एव यत्र श्रिताः नाभिं प्रधिषु च मध्यमवलयं खंडेऽपुतेच हा दशमाससंज्ञाः द्वादशप्रधयपञ्चकमिति श्रुतेः तेषु त्र्यर्पिताः तेऽभिवंक्रं नियतत्यचारं दं हंतत्यातो नेमिप्रसौदिनमानभेदेनपरिवर्तंते अजरं अक्रयं मा पा। मा या मम पं भोअश्विनौ युवाभ्यां प्रवर्त्तीतमि सर्थानसमतः क्लिश्यशति। केवर्षणी। ऐहिक्यामुष्मिकौ यो यज्ञे ततश्च द्विविधमपि
भोगं नेवछेता। तृपि स्मृत्वा दतिभावः ५ः ॥ ॥ ॥ ॥ ॥ ॥ छ

१३

अ० ५२

एवंभूतं स्वषष्टिघटिकात्मकैकाहोरात्रं निर्वर्त्य प्रदक्षिणक्रमेण षष्ट्यधिकशतत्रयपरिमितैः सावनाख्यं संवत्सरचक्रं जगदायुः क्षपणाय गत्वा ह्यावां इदानीं प्रदक्षिणावर्त्तनं भवके सूर्यचंद्रयोः प्रदक्षिणापक्रमेण
निर्वर्त्य सौरचांद्रसंवत्सरचक्रं कर्मोपयोगिनी अहरेकं चक्रमिति। तत्रैकस्मिन्नंशे कौषीताः षट्शलाकाः एवमंतारेत द्वादशारं यदरानाभि एकं चक्रं भवति। तत्र संवत्सरो ह्यः मेषाद्या द्वादशराशयो राः
षड्ऋतवो नाभयः तद्यथा चक्रमतस्य कर्मफलस्य धारणाधियते स्मिन्निति तथा। अत्र हेतुः यस्मिन् विश्वेदेवाः कालाभिमानिनः अधिविषक्ताः अवहिताश्चेति छेदः सिद्धव्यवहितक्रियया उपसर्गाणां
संबंधस्मरणात्। तावश्विनौ मामां मुंचतः मोचयतं अस्माच्चक्रादिति शेषः। किंभूतं मां विविषीदतं जन्मादिदुःखेन विषीदतं प्राप्नुवंतं। न मभावः छांदसः। ततः कालोचितकर्मकरणोत्ताः काला
भिमानिनो देवतास्तर्पयंति। एवं च फलं यजमानाय प्रयच्छंतस्तथा विपरीतं कुर्वंतीति भावः। एवं कर्मणां विविदिषोत्पादनद्वारा विद्याहेतुत्वमुक्त्वा स वैव लिविदं ब्रह्मणा तुल्यानि निशां तत्र यासीनेति
६

एकं चक्रं वर्त्तते द्वादशारं षण्णाभिमेकाक्षममृतस्य धारणं। यस्मिन्देवा अधि विश्वे विषक्तास्तावश्विनौ मुंचतो मा विषीदतं ६ अश्विनाविंद्रममृतं वृत्त
भूयौ तिरोधत्तामश्विनौ दासपत्नी। हित्वा गिरिमश्विनौ गामुदाचरंतौ तद्वृष्टिमह्नात्प्रस्थितौ वलस्य ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

अस्तु तां ब्रह्मोपासनमाह विन्नैकाग्र्याय। अश्विनौ हत्तमभूयौ। वृत्तं निवृत्तं उपलक्षितं विपदादिना सामस्त्येनाभावः मुवोभावइतिक्यप्। अश्विनौ कृत्स्नं प्रपंचात्मका विस्तर्थः एतदेवाश्विनोर्लक्षणमाह वर,
शनेन द्रढयति। अश्विनौ इंद्रं सोमं तद्वयलक्षितानि कर्माणि अमृतं तत्फलं भूतं ऐहिकामुष्मिकं भोग्यजातं तां दासपत्नी सपांसलगिति पूर्वसवर्णः अयः अवयलक्षितं विपदादि च तिरोधत्तां
रज्जुरिव सर्पाध्यस्तमुत्तंगं अनहितं कुरुतः अश्विनावेव सर्वात्मरूपेणोपास्याविति भावः एवमुपासनाल्लब्धे चित्तैकाग्र्ये सप्रपंचस्य बाधनाय ब्रह्मण एवनावस्थानं किं दर्शयति। हित्वेति। अश्वि
नौ स्वरूपेणावस्थैव संतौ वलस्य गिरिं साधनसंपन्नेरूक्षं प्रपंचनाद्य विषयान् हित्वा गाः इंद्रियाणि मुदा विषयेंद्रियसंयोगजहर्षेण वारितौ वा संयतौ विषयमभिमुखं तद्वृष्टिमह्नात्प्रणाः मुदोष्टिः नन्मा
हात्म्येन प्रस्थितौ। विषयज सुखं हि महात्म्यात परां कष्टा वपमेवबासौ। अत्र नायमात्मा बलहीनेन लभ्य इत्यत्र बलशब्दस्य बोधसाधनसंपत्त्यां विलक्षणं गिरिशब्दस्यापि गिरति हवै हृदयं तेयाधानमि

ए० ५२

आसन्नो वस्य ब्रह्मात्मना वबोधार्यं तत्सदार्थस्वरूपं तावदाह युवामिति हे अश्विनौ युवां अग्रे स्थः प्राकृदश दिशः प्राच्याद्या जनयथः अत्र आकाशे एव तत्र योर्याधिकी दिक्कात्मना: तत्तत्त्वरूपत्वमप्याह। मूर्ध्नि अर्था दिशां अन्तरिक्षे स्पर्धः रथयातं रथेन यातं गमनम् अस्ति तं स्पर्धं समानं सर्वेषां एकं। तथा विर्यंति व्योमानि कल्पमेदाहां वकृत्वं जनयथ स्यनवर्तिते। तासां दिशां यातं च अर्थात्संबंधिनः स्पर्शमागमनम अस्पर्धं कृतं दिक्कालावनृतस्य आक्षयः प्रयांति कर्मभिः प्रचरंति। तथा देवा मनुष्याश्च स्पर्धाधिकारमतं क्षितिं एश्वर्यं कर्मफलं आचरंति अस्मा समंतात् भुंजते: एतेन सर्वस्य स्वरूपत्वं सर्वप्रवर्तकत्वं सर्वफल प्रदत्वं च तत्सदार्थस्वरूपमुक्तं ८ एवं भूतस्पष्टिम स्थाभौतिकीं सृष्टिमाह युवामिति। भो अश्विनौ युवां वर्णान् तेजो वन्हानिलो हि नभश्च कृष्णवर्णांविं नि विकुरूथ: परस्परमिश्रणेन नानाविधा न कुरुथः सेयं देवनै कृतं नहं ताह मिमान्ती सो देवता अनेन जीवेनात्मना प्रविश्य नामरूपे व्याकरवाणि तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति श्रुतेः विश्वरूपानत्रीणि रूपाणि सेवसस्याम इति

म॰

युवं दिशो जनयथो दशाग्रे समानं मूर्ध्नि रथयातं वियंति तासां यातमृषयो नु प्रयांति देवा मनुष्याः क्षितिमाचरंति ८ युवां वर्णान्विकुरुथो विश्वरूपां

स्ते विक्षिपंते भुवनानि विश्वा ते भानवो प्यनुसरताश्चरंति देवा मनुष्याः क्षितिमाचरंति ६ ॥ ॥ ॥ ॥ ॥ ॥७

[illegible] श्रुतेः सर्वेषां रूपाणां त्रिवेवांतर्भावात् अग्नीनां वैश्वरूपाते वर्णाश्च विक्षिपंते जनयति भुवनानि चतुर्दश भौतिकानि। विश्वा सर्वाणि। तेच सिद्धाः जीवाः अर्थात् भानवो अंशाः वांशाः अपि विश्वानि भूतानि अनुसरताः चिदंशा अपि देहं द्विपवुद्धि क्रिकारानुसारिणां भूत्वा चरंति विषयान्भुंजते। तएते देवा मनुष्याश्च अग्रे वयप्रस्वादयः क्षितिं भूमिमाश्रित्य संचरंति वर्तंते। अत्र आघश्लोके न तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादि श्रुतेरर्थो दर्शितः द्वितीये ईक्षणादिप्रवेशांता सृष्टिरीशेन कल्पिते त्यस्यार्थस्य प्रदर्शनेन तत्सदार्थ तत्त्वं सर्वभूतस्वरूपत्वं सर्वान्तः प्रविष्टत्वं चेत्येवं लक्षणं प्रदर्शितम् ६ ॥श्रीरामायनम॥ ॥श्रीरमनामनाकं॥ ॥श्रीरामचंद्राय नम॥ ॥श्रीकालभैरवायनम॥ ॥राम

उक्तं विधं तस्य दार्थमन्स्य एवं संघात एव वक्तैको नाम स्तत स्थेतनो ऽस्तीत्याह ताविति। तौ प्रसिद्धौ नासत्याव् अश्विनौ वायुर्वा महे सृजये ऽर्ह। तथा पुवं पुष्करस्य। व्योम पुष्करमंबरं। आकाशो ऽत्र व्याकृतं अव्यक्त
मित्यनर्थान्तरं। तस्य सृजं सृजंत इति तत्कार्यजातं विभृथः प्रविश्य धारयथः तदपि महे ऽस्मत्तुष्ट्यर्थं जाते। तौ नासत्यौ ऽन्यस्तौ निसमुत्तौ ऽज्ञाता वृधौ कान तस्य कर्मफलस्योपद्रष्टकौ। न हि वृत्तिरर्थवीति दीर्घः
ऋते विना देवाः वागाद्या मिमानिनो ऽ स्यादयः तस्य पदे तेषां वागादिविषयाणां वचनादीनां प्रयदेप्रासयेन स्तेस्वेनेन स मर्था भवंति। सृजेऽरिति छांदसो ऽत्र स यः कोऽप्यवाग्मात्कः प्राणापानपदे
यस्याकाश आनंदो न स्यादिति श्रुतेर्न चेतनं प्रवर्तकमन्तेशकरवदचेतनः संघातः प्रवर्तत इति भावः तदेवं नान्यो ऽतो ऽस्ति द्रष्टेति चेतनांतरनिषेधात् तत्त्वमसीति जीवेशयोरभेदश्रवणात प्रपंच
स्य चारंभणं विकारो नामधेयमित्यस्मत्तल्पश्रवणाच्चाद्वैतं ब्रह्मैवास्तीति सिद्धं अत्रापि च अश्विनो जगद्यादभ्नसोऽन्का तौ नासत्या विनियदद्वयेन तत्त्वंपदार्थयोः पूर्वापरार्द्वयोः तत्पशब्दोपादानेन जीवेश

म१

तौ नासत्याव् अश्विनौ वां महे सृजं यपाविभृथः पुष्करस्य तौ नासत्यावमताहत्ता वृधा हृते देवा तस्य पदेन सृते १० सुखेन गर्भं लभेतां युवा नौ गतास्य रेत स्य
पदेन सृते सद्यो जातो मातरमत्त्रिगर्भस्तावश्विनौ मंचयो जीवसे गाः ११ ॥ ॥ ॥ ॥ ॥ ॥

भेदप्रतिपादनेन च प्रसाधितं १० एवं ब्रह्मविधां समाप्य केषांचिन्मते संघात एव चेतयते नान्यस्तत स्थेतनो ऽस्तीति तद्दूषयन्नस्य स वक्तुः प्रार्थयते सुखेनेति। युवां नौ मातापितरौ। अन्नात् पुरुष इति श्रुते सुखे
नात्र रूपं गर्भं प्रथमं लभेतां। ततः एतत एतं गर्भं छांदसं क्लीवत्वं पुंस्त्विरेतो रूपेणाश्वीपुशोणितरूपेणापरिणतं गतास्य चेतनो देहः पदेन पुष्कषेणापद्यते सत्वमनेनेति प्रपदमुपस्थं द्वियं सर्वे
षामानंदानामुपस्थ एकायनमिति श्रुतेः तेन पूर्वै रेतः सिक्तस्ते पश्चात्स्त्रीत्वात् संघातस्य मलपिंडवदचेतनत्वं सिद्धं सद्योजातस्तत्क्षणमात्रो गर्भो बालः मातरं अत्तिस्तनयानेप्रवर्तत इत्यर्थ
ः तदेतज्जन्मांतरीयानुभवाहितसंस्कारमंतरेण न संभवतीति श्रुतिपूर्वं सिद्धः संघातादन्यश्चेतनस्तत्स्ववर्तकोऽस्तीति सिद्धं तावश्विनौ सोऽत्राम्भुपलक्षितं ब्रह्म तावीतिविवेष्यापेक्षया हि लं
शैसंहियत्तात्पाक्षतिर्जलस्येतिवत् एतेन तत्त्वमसीति वाक्यार्थ उक्तः जीवसे जीवनाय गाः वक्तुः पीमुंचतः वक्तुः प्रतिबंधापनं क्षिपास्तामित्यर्थः ११ ॥ ॥ ॥

अपूपः स्नेहपक्वभक्ष्यविशेषः छांदोग्ये मधुपेश्यां वृक्णछिद्रायां मध्व इत्यपूपयोगात्पावंस रक्षच्छिद्राणि तिष्ठंति विशेषेस्मरणाच्चातदपि सच्छिद्रमिति गम्यते । अशानभक्षय ५९ ६० ६१ ६२
कार्ष्णायसा दंता इस्य उपाध्यायस्य निर्दयत्वं सूचितं । तव हिरण्मया इति त्वं शिष्येभ्यः सदयाश्च इति त्वं शिष्येभ्यः सदयावाक्यम भविष्यसीति तेनानुपताप्येषां तया त्वमनुगृहीता या दिशकं भवति श्रेयो ज्ञानं ६३

इत्येवं तावभिष्टुतावश्विनावाजग्मतुराहतुश्चैनं प्रीतौ स्वस्तवैष । अपूपोऽशानैनमिति ५९ स एवमुक्तः प्रत्युवाच नानृतमूचतुर्भगवंतौ न त्वहमेतमपूपमुप-
योक्तुमुत्सहे गुरवे ऽनिवेद्येति ६० ततस्तमश्विनावूचतुः आवाभ्यां पुरस्ताद्भवत उपाध्यायेनाभिष्टुताभ्यां अपूपो दत्त उपयुक्तः स तेनानिवेद्य गुरवे त्वमपि
तथैव कुरुष्व यथा कृतमुपाध्यायेनेति ६१ स एवमुक्तः प्रत्युवाच एतत्प्रत्यनुनये भवंतावश्विनौ नोत्सहेहमनिवेद्य गुरवे ऽपूपमुपयोक्तुमि-
ति ६२ तमाश्विनावाहतुः प्रीतौ स्वस्तवानया गुरुभक्त्या उपाध्यायस्य ते कार्ष्णायसा दंता भवतो हिरण्मया दंता भविष्यंति चक्षुष्मांश्च भविष्यसि श्रे-
यश्चावाप्स्यसीति ६३ स एवमुक्तोऽश्विभ्यां लब्धचक्षुरुपाध्यायसकाशमागम्योपाध्यायमभ्यवादयत् आचचक्षे स चास्य प्रीतिमानभूत् आह चैनं यथाऽश्वि-
नावाहतुस्तथा त्वं श्रेयोऽवाप्स्यसीति ६४ सर्वे च ते वेदाः प्रतिभास्यंति सर्वाणि च धर्मशास्त्राणीति एषा तस्यापि परीक्षोपमन्योः ६५ अथापरः शिष्य-
स्तस्यैवायोदधौम्यस्य वेदो नाम तमुपाध्यायः समादिदेश वत्स वेद इहास्यतां तावन्मम गृहे कंचित्कालं शुश्रूषमाणेन भवितव्यं श्रेयस्ते भविष्यतीति ६६

६४ ६५ शुश्रूषमाणेनेवापरेण ६६ ॥ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

आ०
५५

गौर्बलीवर्दः ६७ अत्र अत्र सत्यमपि गुरुकार्ये देहस्यायोगेनापि कर्तव्यमिति उद्दालकस्याख्यानं साधारणकर्म अप्याहारादिकं गुरुतत्त्वात्सामान्यमिति उपमन्योरसंगतं दुष्करमपि यस्मादियोगं कार्यं गुरुनियोगात् न
निश्चितमिति वेदस्य परीक्षा यास्तास्सर्वे बोध्यं एवमग्रेप्याख्यायिकानां सर्वासां गूढानि ६८ अथ प्रमेयामम निष्ठं तं गुरुस्पर्धीं न तोषयेत्। गुर्वर्थं यत्नमानं तमनुगृह्णाति देवता इत्येतद्दर्शयितुमुत्तंका

तो१
स तथेत्युक्त्वा गुरुकुले दीर्घकालं गुरुशुश्रूषणपरोऽवसत् गौरिव नित्यं गुरुषु धूर्षु नियोज्यमानः शीतोष्णक्षुत्तृष्णादुःखसहः सर्वत्राप्रतिकूलः ६७ त
स्य महता कालेन गुरुः परितोषं जगाम। तत्परितोषाच्च श्रेयः सर्वज्ञतां चावाप एषा तस्यापि परीक्षा वेदस्य ६८ स उपाध्यायेनानुज्ञातः समावृत्तस्तस्माद्गुरुकुल
वासाद्गृहाश्रमं प्रत्यपद्यत ६९ तस्यापि स्वगृहे वसतस्त्रयः शिष्या बभूवुः स शिष्यान्न किंचिदुवाच कर्म वा क्रियतां गुरुशुश्रूषा वेति दुःखाभिज्ञो हि गुरु
कुलवासस्य शिष्यान्परिक्लेशेन योजयितुं नेयेष ७० अथ कस्मिंश्चित्काले वेदं ब्राह्मणं जनमेजयः पौष्यश्च क्षत्रियावुपेत्य वरयित्वोपाध्यायं वव्रतु
: ७१ स कदाचिद्याज्यकार्येणाभिप्रस्थितः उत्तङ्कं नाम शिष्यं नियोजयामास भो उत्तङ्क यत्किंचिदस्मद्गृहे परिहीयते तदिच्छाम्यहमपरिहीनं
भवन्तं क्रियमाणमिति स एवं प्रतिसन्दिश्योत्तङ्कं वेदः प्रवासं जगाम ७२ अथोत्तङ्कः शुश्रूषुर्गुरुनियोगमनुतिष्ठमानो गुरुकुले वसति स्म स
तत्र वसमान उपाध्यायस्त्रीभिः सहिताभिराहूयोक्तः ७३ ॥ ॥ ॥ ॥ छ

ख्यायिकामाह स उपाध्यायेनेत्यादिना सः वेदः समावृत्तः मेखलाजिनादि ब्रह्मचर्याश्रमलिंगं यस्मात् स्नातकं बभूवेत्यर्थः ६९ नेयेष कामितवान् ७० ७१ नियोजयामास अग्निशुश्रूषा
दाविति शेषः ७२ वसमानः वसन्। उपाध्यायस्त्रीभिः उपाध्यायाश्रमवासिनीभिरन्याभिः स्त्रीभिः ७३ ॥ ॥ ॥ ॥ ॥

रा०
५५

वंध्यउपगमशून्यः पांडांतरेऋतुरकर्मविषीदतीतियोहीयते ७४ ७७ आहुर्वृद्धाः ७८ यश्चेतियोजनेहिदंदत्तंवैतेनमयाजयंतस्मादर्घ्याप्यःप्रतिगृह्णतोवैतेनतमपाजयंतस्मात्प्रतिगृह्णताया
जमशुभंपराभ्युवंतीतिश्रूयतेतेनइदंस्थापनेपियाजनवृत्तौविकाराद्येदेवाध्याप्यः प्रतिगृह्णतैवाध्यापयमितिधर्मः तत्रापः अधर्मेणदक्षिणापाच्छयग्रहणेनश्रूयादध्यापयेतपश्चाधर्मेणत

उपाध्यायिनीतेऋतुमतीउपाध्यायश्चतेप्रोषितः अस्यायथायमृतुर्वंध्योनभवतितथाक्रियतामेषाविषीदतीति ७४ सएवमुक्तस्ताभिःस्त्रीभिःप्र
त्युवाच नमयास्त्रीणांवचनादिदमकार्यंकरणीयं नह्यहमुपाध्यायेनसंदिष्टोयदकार्यमपिकार्यंत्वयाकार्यमिति ७५ तस्यपुनरुपाध्यायःका
लांतरेणगृहमाजगामतस्मात्प्रवासात्सतद्वृत्तंतस्याशेषमुपलभ्यप्रीतिमानभूत् ७६ उवाचचैनंवत्सोत्तंककिंतेप्रियंकरवाणीतिधर्मतोहिशु
श्रूषितोस्मिभवतातेनप्रीतिःपरस्परेणनौसंवृद्धातदनुजानेभवंतंसर्वानेवकामानवाप्स्यसिगम्यतामिति ७७ सएवमुक्तःप्रत्युवाचकिंतेप्रि
यंकरवाणीत्येवमाहुः ७८ यश्चाधर्मेणवैब्रूयाद्यश्चाधर्मेणपृच्छति तयोरन्यतरःप्रैतिविद्वेषंवाधिगच्छति ७९ सोहमनुज्ञातस्त्वयाइच्छामिगुर्वर्थमु
पहर्तुमिति।तेनैवमुक्तउपाध्यायः प्रत्युवाच वत्सोत्तंकउष्यतांतावदिति ८० सकदाचित्तमुपाध्यायमाहोत्तंकः आज्ञापयतुभवान्किंते
प्रियमुपहरामिगुर्वर्थमिति ८१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

द्रस्मर्पणेनपृच्छतिअधीते।तयोरन्यतरआदाताअप्रतिग्रहीतावाप्रैतिम्रियते।विद्वेषंवाधिगच्छति।महद्गुरुदक्षिणापात्रम् ८० अहेतवाधर्मःस्यात्ममचानेनाहंकृतकृत्योनस्यांतथाप्यन्तरइतिलिपि ॥
दोषः स्यादितिभावः ७९ तावदितिकालांतरेत्वदिष्टंसेत्स्यतीतिभावः ८१ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

८३ पिनद्धे परिहिते पुण्यकं व्रतोत्सवः भविता भविष्यति ८४ ऋषभः ऋष्यपनादिजन्यो धर्मः तमधिरूढः पुरुषस्तदधिष्ठाता ईश्वरः पुरीषं धर्मफलं स्वर्गः मूत्रं अमृतं अत्र वर्षभादिरूपकेणाधर्मबला-
दनिष्टनिवृत्तिरिष्टप्राप्तिश्च भवतीति प्रदर्शितं ८५ ८६ संभ्रांतः कार्यव्यग्रः स्थितोः तु विशन्नेवाचाम्य प्रतस्थे कार्यशैघ्र्यात् तावतैवास्य विलंबदोषेणाप्यत्र त्रियांनापश्यत् । अशुचित्वदोषा

तमुपाध्यायः प्रत्युवाच वत्सोत्तंक बहुशो मां चोदयसि गुर्वर्थमाहरामीति तद्गच्छैनां प्रविश्योपाध्यायिनीं पृच्छ किमुपाहरामीति एषा यद्ब्रवीति तदुपाहर-
स्वेति ८२ स एवमुक्त उपाध्यायेनोपाध्यायिनीमपृच्छत् भगवत्युपाध्यायेनास्म्यनुज्ञातो गृहं गंतुमिच्छामीष्टं ते गुर्वर्थमुपाहृत्यानृणो गंतुमिति ८३
तदाज्ञापयतु भवती किमुपहरामि गुर्वर्थमिति सैवमुक्ताउपाध्यायिनी उत्तंकं प्रत्युवाच गच्छ पौष्यं प्रति राजानं कुंडले भिक्षितुं तस्य क्षत्रियया पिनद्धे
ते आनयस्व इतश्चतुर्थेऽहनि पुण्यकं भविता ताभ्यां पिनद्धाभ्यां शोभमाना ब्राह्मणान्परिवेष्टुमिच्छामि तत्संपादयस्व एवं हि कुर्वतः श्रेयो भविता अन्यथा श्रेयः
कुतः इति ८४ स एवमुक्तस्तया प्रातिष्ठतोत्तंकः स पथि गच्छन्नपश्यदृषभमतिप्रमाणं तमधिरूढं च पुरुषमतिप्रमाणमेव स पुरुष उत्तंकमभ्यभा-
षत भो उत्तंक एतत्पुरीषमस्य ऋषभस्य भक्षयस्वेति ८५ स एवमुक्तो नैच्छत् तमाह पुरुषो भूयो भक्षयस्वोत्तंक मा विचारयोपाध्यायेनापि ते भक्षितं पूर्व-
मिति ८६ स एवमुक्तो बाढमित्युक्त्वा तदा तदृषभस्य मूत्रं पुरीषं च भक्षयित्वोत्तंकः संभ्रांतः स्थित एवाचम्य प्रतस्थे ८७ ॥ ॥

देवर्ष्यादीनां नामपि देवतादिदर्शनं न जायत इति भावः ८७ ॥ ॥ ७ ॥ ॥ ॥ ॥

८८ ८९ ९० पतिव्रतात्वादिति पातिव्रत्यसाहेवतावत्समापराधेपिविप्रयोरुर्लज्जाभवंतीतितद्धर्ममाहात्म्यंदर्शितं ९२ अथेतितिष्ठन्ताछंश्छाचांतोस्नाचांतएवेसर्थीः ९३ खा

यत्रसक्षत्रियः पौष्यस्तमुपेत्यासीनमपश्यदुत्तंकमुत्तंकस्तमुपेत्याशीर्भिरभिनंद्योवाचअर्थीभवंतमुपागतोस्मीति ८८ स एनमभिवाद्योवाचभगवन्पौष्यः खल्वहं किंकरवाणीति ८९ सतमुवाच।गुर्वर्थेकुंडलयोरर्थेनाभ्यागतोस्मीति येवैतेक्षत्रियया पिनद्धेकुंडलेभवान्दातुमर्हतीति ९० तंपौष्यःप्रत्युवाचप्रविश्यांतःपुरंक्षत्रियायाच्यतामिति सतेनैवमुक्तः प्रविश्यांतःपुरंक्षत्रियांनापश्यत्। सपौष्यंपुनरुवाच नयुक्तंभवता ऽ हमनृतेनोपचरितुंनहितेऽत्र पुरेक्षत्रियासन्निहिता नैनांपश्यामि ९१ सएवमुक्तः पौष्यः क्षणमात्रंविमृश्योत्तंकंप्रत्युवाचनियतंभवानुच्छिष्टः स्मरतावत् नहिसाक्षत्रियाउच्छिष्टेनाशुचिनाशक्याद्रष्टुंपतिव्रतात्वात् सैषानाशुचेर्दर्शनमुपैतीति ९२ अथैवमुक्तउत्तंकः स्मृत्वोवाच अस्तिखलुमयोच्छिष्टेनोपस्पृष्टंशीघ्रंगच्छताचेति तंपौष्यः प्रत्युवाचएषतेव्यतिक्रमोनोच्छिष्टेनोपस्पृष्टंभवतीति शीघ्रंगच्छताचेति ९३ अथोत्तंकस्तथेत्युक्त्वाप्राङ्मुखउपविश्यसुप्रक्षालितपाणिपादवदनो निःशब्दाभिरफेनाभिरहृद्गताभिरद्भिः त्रिःपीत्वाद्विः परिमृज्यखान्यद्भिरुपस्पृश्यचांतःपुरंप्रविवेशततस्तांक्षत्रियामपश्यत् ९४ ॥ ॥ ॥ ॥

निरिंद्रियच्छिद्राणि ९४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ९

९५ सद्भावेन गुरुभक्त्या ९६ हे भवति त्वं निर्वृत्ता निश्चिन्ता भव इत्युवाचेति संबंधः ९७ ९८ भवता उपाहृतं न पश्यामि विशिष्टं इच्छामीति संबंधः १०० अत्र सर्वत्र शापप्राप्तेन मम साक्षात्केशकीटाद्यवयव
त्वमन्नं ददत् अंधो भवतीति दर्शितं तस्मात्परीक्ष्य देयमिति भावः विनापराधं दत्तः शापोऽपि निष्फलो भवतीत्यनुमेयं तज्ञात्तत्र प्रतिशापस्यैवैयर्थ्यदर्शनात् १०१ ॥ ॥ ॥

साचदृष्ट्वैवोत्तंकंप्रत्युत्थायाभिवाद्योवाच स्वागतंतेभगवन्नाज्ञापयकिंकरवाणीति सतामुवाचैतेकुंडलेगुर्वर्थंमेभिक्षितेदातुमर्हसीति ९५ साप्रीतातेनतस्यसद्भा
वेनपात्रमयमनतिक्रमणीयश्चेतिमत्वाकुंडलेअवमुच्यास्मैप्रायच्छदाहचैनमेतेकुंडलेतक्षकोनागराजः सुभृशंप्रार्थयत्यप्रमत्तोनेतुमर्हसीति ९६ सएवमुक्तस्तांक्ष
त्रियांप्रत्युवाचभवतिसुनिर्वृत्ताभवनमांशक्तस्तक्षकोनागराजोधर्षयितुमिति ९७ सएवमुक्त्वातांक्षत्रियामामंत्र्यपौष्यसकाशमागच्छत् आहचैनंपौष्यप्रीतो
ऽस्मीति ९८ तमुत्तंकंपौष्यः प्रत्युवाचभगवंश्चिरेणपात्रमासाद्यते भवांश्चगुणवानतिथिस्तदिच्छेश्राद्धंकर्तुंक्रियतांक्षणइति ९९ तमुत्तंकः प्रत्युवाचकृतक्ष
णएवास्मिशीघ्रमिच्छामियथोपपन्नमुपस्कृतमन्नंभवतेति सतथेत्युक्त्वायथोपपन्नेनान्नेनैनंभोजयामास १०० अथोत्तंकः सकेशंशीतमन्नंदृष्ट्वाअशुच्येत
दितिमत्वातंपौष्यमुवाच यस्मान्मेअशुच्यन्नंददासितस्मात्त्वमंधोभविष्यसीति १ तंपौष्यः प्रत्युवाचयस्मात्त्वमदुष्टमन्नंदूषयसितस्मात्त्वमनपत्योभविष्य
सीति २ तमुत्तंकः प्रत्युवाचनयुक्तंभवताऽन्नमशुचिंदत्त्वाप्रतिशापंदातुं तस्मादन्नमेवप्रत्यक्षीकुरुततः पौष्यस्तदन्नमशुचिंदृष्ट्वातस्याशुचिभावमपरीक्षयामास

श्रीरामजयरामजयरामजयरामजयरामजयरामजयरामजयरामजयरामजयरामरामजयरामजयरामजयराम रामराम राम राम॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

५ न चिरान्न शीघ्रं ६ प्रसादात्तमुपसंहर्तुं ७ नवनीतं तद्वत् शीघ्रद्रावि द्रवः तद्वत् जीवितादेर्मूर्छेदकः ८ गम्यतां त्वयेति शेषः ९ तेत्वया १० साधयाम शापाभावं निश्चितमङ्कपणा

अथ तदन्नं मुक्तकेश्याग्निपोपहृतं अनुसममशुचेत दितिमत्वा तमृषिमुत्तंकं प्रसादयामास ४ भगवन्नज्ञानादेतदन्नं सकेशमुपहृतं तत्क्षामये भवन्तं न भवे यमंध इति ५ तमुत्तंकः प्रत्युवाच न मृषा ब्रवीमि भूत्वा त्वमंधो न चिरादनंधो भविष्यसीति ममापि त्वं शापो न भवेद्भवता दत्त इति ६ तं पौष्यः प्रत्युवाच नाहं शक्तः शापं प्रत्यादातुं न हि मे मन्युरद्याप्युपशमं गच्छति किं चैतद्भवता न ज्ञायते ७ यथा नवनीतं हृदयं ब्राह्मणस्य वाचि क्षुरो निहितस्तीक्ष्णधारः तदुभयमेतद्विपरीतं क्षत्रियस्य वाक् नवनीतं हृदयं तीक्ष्णधारमिति ८ तदेवं गते न शक्तोऽहं तीक्ष्णहृदयत्वात्तं शापमन्यथा कर्तुं गम्यतामिति ९ तमुत्तंकः प्रत्युवाच भवताहमन्नस्याशुचिभावमाकलय्य प्रत्यनुनीतस्तथा प्राक्ते ऽभिहितं यस्माद्दुष्टमन्नं ददासि तस्मादनपत्यो भविष्यसीति दुष्टे चान्ने मम नैष शापो भविष्यतीति १० साधयामस्तावदित्युक्त्वा प्रातिष्ठतोत्तंकस्ते कुंडले गृहीत्वा सोऽपश्यदथ पथि नग्नं क्षपणकमागच्छन्तं मुहुर्मुहुर्दृश्यमानं च ११ अथोत्तंकस्ते कुंडले सम्प्रसभं भूमावुदकार्थं प्रचक्रमे एतस्मिन्नन्तरे स क्षपणकस्त्वरमाण उपसृत्य ते कुंडले गृहीत्वा प्राद्रवत् १२ तमुत्तंकोऽभिसृत्य कृतोदककार्यः शुचिः प्रयतो नमो देवेभ्यो गुरुभ्यश्च कृत्वा महता जवेन तमन्वयात् १३ तस्य तक्षको दृढमासन्नः स तं जग्राह गृहीतमात्रः स तद्रूपं विहाय तक्षकस्वरूपं कृत्वा महसा धरण्यां विवृतं महाबिलं प्रविवेश १४ प्रविश्य च नागलोकं स्वभवनमगच्छत् ॥ ॥ ॥छ॥

कंपायेंउमिद्धं ११ उदकार्थं शौचाचमनादि प्रचक्रमे कर्तुमिति शेषः १२ नमः कृत्वेति संबंधः १३ दृढमासन्नः अत्यन्तसन्निहितः १४ १५ ॥ ॥

अन्वगच्छतज्ञातवान १६ प्रसादाः देवतादेवगृहाणिहर्म्याणिधनिकानांगृहाणिवलभ्योमध्योच्छ्रिताउभयतोनमत्यक्षागृहविशेषाः निर्व्यूहाः पट्टशालाः १७ एरावतोराजायेषांते। समितिः शो
भनाः राज्ञाखिन्नः जीमूताइवशस्त्रधाराः क्रूरंतः कीदृशाःताः सविद्युतः पवनस्येवदुर्दिनंगमनंयासांताः शीघ्राः सफलाश्वाशस्त्रधाराइसध्याहाराः १८ कल्माषकुंडलाः चित्रकुंडलाः

अथोत्तंकस्तस्याः क्षत्रियायावचः श्रुत्वातत्कुकमन्वगच्छतसतद्बिलंदंडकाष्ठेनचखान: नचाशकततंक्लिश्यमानमिंद्रोपश्यत्सवज्रंप्रेषयाम। गच्छास्यब्राह्मणा
स्यसाहाय्यंकुरुष्वेति १९ अथवज्रोदंडकाष्ठमनुप्रविश्यतद्बिलमदारयत तमुत्तंकोनुविवेशतेनैवविलेन प्रविश्यचतंनागलोकमपर्यंतमनेक
विधप्रासादहर्म्यवलभीनिर्व्यूहशतसंकुलमुच्चावचक्रीडाश्चर्यस्थानावकीर्णमपश्यत सतत्रनागांस्तांस्तुष्टावेभिः श्लोकैः॥ २७ यएरावतराजानः सर्पाः
समितिशोभनाः क्षरंतइवजीमूताः सविद्युत्पवनेरिताः २८ सुरूपाबहुरूपाश्चतथाकल्माषकुंडलाः आदित्यवन्नाकपृष्ठेरेजुरैरावतोद्भवाः १९
बहूनिनागवेश्मानिगंगायास्तीरउत्तरे तत्रस्थानपिसंस्तौमिमहतः पन्नगानहं २० इच्छेत्कोर्कांशुसेनायांचर्तुमैरावतंविना शतान्यशीतिरष्टौचस
हस्राणिचविंशतिः सर्पाणांप्रग्रहायांतिधृतराष्ट्रोयदैजत २१ येचैनमुपसर्पंतियेचदूरपथंगताः अहमैरावतज्येष्ठभ्रातृभ्योऽकरवंनमः २२ यस्य
वासः कुरुक्षेत्रेखांडवेचाभवत्सदा तंनागराजमस्तौषंकुंडलार्थायतक्षकं २३ तक्षकश्चाश्वसेनश्च नित्यंसहचरावुभौ कुरुक्षेत्रेचनिवसतांनदीमि
क्षुमतीमनु २४ जघन्यजस्तक्षकस्यश्रुतसेनेतियःश्रुतः २५

:२१ २० अर्कांशुनामातितिक्ष्णानांसेनायांसमूहेचर्तुंपंथानगंतुंएरावतादृतेएरावताभ्रातायदाएजतिदीप्यतेराजत्वेजत्भ्रातृत्वेदीप्तासाविससर्पंतदा। अधिकान्यष्टाविंशतिसहस्राणिसर्पाणां
प्रग्रहाः सर्वेहयरश्मिभूतानागाः यांति। सौरंतेजोपिपन्नगसान्निध्यादुःसहसपात्रदग्धुमीष्टइसर्थः २१ २२ २५ ॥ ॥ ॥

महद्युम्नितीर्थविशेषइतिभावः महद्युम्निस्थैतन्नसमीपेनामगुख्यातांआर्यपनकुरुक्षेत्रेस्वसरितिपूर्वेणासंबंधः कुरुक्षेत्रेवासमात्रादेवमहत्फलंप्राप्यतइत्याशयः द्युमानिमत्रेमनिवआदिलोपश्चा
र्षः २६ २७ तंत्रेदंतपंक्तिकाकारेशलाकामयेपंत्रेयस्टंदीर्घतंतस्पंअभिरोप्यावेमातिर्यक्तंविक्षेपणायंत्रंशोभनेवेमपयोस्तस्वेमे। वयंतौसंततत्वाने। मंत्रवादश्लोकैः मंत्रार्थानांवा
देयेषुतिमध्यमपदलोपीसमासः मंत्रार्थवादाश्चतेश्लोकाश्चतैः २८ अत्रतंत्रचक्रपुरुषाश्वरूपकेणसंसारकालः ईश्वरः प्रजापतिश्चनिरूप्यंते। तत्रप्रथमंकालेनमस्यति त्रीणीति। अ
स्मिन्ध्रुवेअर्पितशतरोस्वचक्रेकालचक्रेनिसंअनवरतंचरतिसंचरमाणोमतिसूत्रत्रिष्टिसमयेमध्येअसचक्रस्यांतराले त्रीणिशतानिषष्टिश्चदिनानि विशेषः अर्पितानिसंस्थापितानिसंतिषट्कुमा

अवसथोमहद्युम्निप्राप्यैतन्नागमुख्यानां कल्याणिमदावाहंनमस्तेस्मैमहात्मने २६ ए[illegible]वंस्तुत्वासविप्रर्षिस्तत्रकोभुजगोत्तमान नैवतेकुंडलेलेभेततस्तुष्टावनागमु
पागमत २७ एवंस्तुत्वापिनानागान्यदातेकुंडलेनालभन्तदा पश्यत्स्त्रियौतंत्रेअधिरोप्यसुवेमे[illegible]पटं[illegible]वयंत्यौ तस्मिंश्चतंत्रेकृष्णाः सिताश्चतंतवश्चक्रं
चापश्यत्षड्भिःकुमारैः परिवर्त्यमानंपुरुषंचापश्यद्दर्शनीयं सतान्सर्वानस्तावैभिर्मंत्रवादश्लोकैः २८ त्रीण्यर्पितान्यत्रशतानिमध्येषष्टिश्चनित्यं
चरतिध्रुवेस्मिन् चक्रेचतुर्विंशतिपर्वयोगे षड्वैकुमाराः परिवर्त्तयंति २९ तंत्रंचेदंविश्वरूपेयुवत्यौवयतस्तंतून्सततंवर्त्तयंत्यौ ॥ ॥ ॥ ७

श्रिय २

एकस्मिन्नवः परिवर्त्तयंतिचालयंतिः कीदृशेस्मिन्चतुर्विंशतेः पर्वणांद्वादशपूर्णिमामास्याश्चचतुर्विंशतिः पर्वाणितेषांयोगसंबंधोयत्रतस्मिन्पदेवंविधंसंवत्सरचक्रंतस्मैनमोस्त्विति चतुर्थेना
न्वयः २९ तंत्रंनमस्यतितंत्रमिति। तंत्रस्तु पटरूपंबुष्टितमर्पयंचं। युवत्यौनिसर्गतःपौमायाविद्ये तत्रमायावीईश्वरः पर्जन्यवत्सर्वसाधारणोधातेत्युच्यते। अविद्यावान्प्रजापतिः वीज
वतत्रिविधरूपत्वाद्विधातेतित्रयाधिष्ठानाधारा[illegible]देवते एवयुवत्यौविश्वरूपेसर्वात्मिकेइदंतंत्रंवयतःसंतानयतः तंतवोयाविषयःसंततेसर्वदातेतुवासनामयानवर्त्तयंत्यौनयंत्यौ। तत्रप्रि
भिन्नानुसारेणतत्तत्स्थानिगताः वासनाःउत्तमयंत्याविसर्थः ॥

द्वादशदर्शीः ४

तं: २

कस्मान्न पापरूपान्मितास्ते पुण्यपापरूपानन्तं तन्न विवर्जयंत्सौ विविधरूपेणानयंत्सौ पुण्यपापात्मकमपि पापवासनां पापपुण्यात्मकमपि पुण्यवासनामनादिकालबद्धसांस्कृत्यस्मात्तदुत्तमं भयं तावित्यर्थः तत्रश्च हेतो
भुवनानि चतुर्दश वर्तिभूतानि जरायुजादीन निवर्जयंत्सौ। भूस्थानस्वर्गस्वर्गस्थान्नाके निरयस्थाश्च भुवं नयंता वित्यर्थः अत्रापि तामपामिति विपरिणामेनानुकृष्यप्रवर्तीभ्यां नमइ पकृष्यते ३० ईश्वरं न
मसानि वज्रस्येति अत्राधिदैवस्पष्टएवार्थः अश्वमेधयज्ञौ कृतौ सा तं इंद्र वज्रहृत्त शब्दानां ईश्वरविवेक मायावाचित्वमुपगम्यते वेदित्व्यमर्थः संभवति। ईश्वर एव वा विद्यावशाज्जीवत्वमायन्न ग्रहशास्त्राद्यनुग्र
हात वज्रस्य विवेकस्य धर्त्ता भवति तैश्च भुवनास्यगोसा सर्वभूतामयपदः सन्यासी भवति। अत एव वहन्नस्याज्ञानस्य हंतानमुचिः सत्यपितत्वज्ञाने ऽनुवर्तमानः अविद्याले शः तस्यापि निहंता देहयातेकात्स्न्ये
न

कस्मान्मितांश्चापि विवर्जयंत्सौ भूतान्यजस्रं भुवनानि चैव ३० वज्रस्य भर्त्ता भुवनस्य गोप्ता वृत्रस्य हंता नमुचेर्निहंता कस्मै वसानो वसने महात्मा सत्यानृते
यो विविनक्ति लोके ३१

न निवर्तकः कस्मै विद्याविद्ये पापाकार्यत्वात् उभे अपि कस्मैयथोक्तं श्रीमद्भागवते विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणां। मोक्षबंधकरी आद्ये मायया मे विनिर्मिते इति वसनवदावारकेवमानस्वकुर्वन् वहस्व
रूपेण संचरन। महात्मा व्यापकः दृष्टविरुद्धमेतदिमाशंक्याह। स सेति। लोके जीवस्येव देहे य ईश्वरः साधकानां सत्यानृते हृद्गृहरूपं विविनक्ति पृथक्करोति। अन्यत्रावाधनेन सत्यस्यैवावशेषात् यो विवि
नक्ति तस्मै नमः इत्युत्तरेणान्वयः अस्य माहात्म्यं विद्वद्भवगम्यं मूढानां चागोचर इत्यर्थः ३१ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अथ वृत्रापतिं नमस्येत्स्म पूर्वोक्तेन ईश्वरेण सहाभेदमाह य इति पदं वाजिनं वेगवन्तं अश्वरूपिणं वा अपां गर्भे च अग्निः संभूतं ईश्वरज्ञातं वा पुराणं अग्ने एष इति श्रुतेः पामपि पूर्वैः सा विषया ईश्वरस्याधिक
त्वं कं वा वैश्वानरं वह्निर्विराट्स्वरूपं स वा वाहनं इन्द्रविषयाप्रापकं परमेश्वराधिष्ठितं वा अभ्युपैति अश्वमरति देवतारूपेणाश्रयं तर्पयति मिरूपेण वा तस्मै जगदीश्वराय लोकत्रयप्रभूस्यादेर्नामिन्द्रादेर्वा ईशाय पुरंदराय देवाधि
पतये पुरः स्थूलसूक्ष्मकारणशरीराणि दूरं पति आत्मावगमेन बाधमानाय वा तस्मै नमोऽस्तु। अत्र यथा मस्य कामस्य गुरुगवीरभिर्हृतः अमानुषेर्कोऽयं भारिभिर्विह्नविद्या उक्ता यथा वा उयक्तो मल

यो वाजिनं गर्भमपां पुराणं वैश्वानरं वाहनमभ्युपैति नमोऽस्तु तस्मै जगदीश्वराय लोकत्रयेशाय पुरंदराय ३२ ततः स एनं पुरुषः प्राह प्रीतोऽस्मि तेऽहमनेन स्तोत्रे
ण किं ते प्रियं करवाणीति स तमुवाच नागा मे वशमीयुरिति ३३ स चैनं पुरुषः पुनरुवाच एतमश्वमपाने धमस्वेति। ततोऽश्वस्यापानमधमत्ततोऽश्वाद्
ध्मायमानात्सर्वस्रोतोभ्यः पावकार्चिषः सधूमा निष्पेतुः ३४ ताभिर्नागलोक उपधूपिते ससंभ्रान्तस्तक्षकोऽग्नेस्तेजोभयाद्विषण्णः कुंडले गृहीत्वा सहसा स्वभ
वनान्निष्क्रम्योत्तङ्कमुवाच इमे कुंडले गृह्णातु भवानिति ३५ स ते प्रतिजग्राहोत्तङ्कः प्रतिगृह्य च कुंडले अचिन्तयदद्य तत्पुण्यकमुपाध्यायिन्याः दूरं चाहमभ्याग
तः स कथं संभावयेयमिति॥ ३६ ॥ ॥ ॥ ॥ ॥ ॥ ७

स गुरोरग्नीन्परिचरतोऽग्निभिरुपदेशः कृत एवं उत्तंकस्यापि गुरुभक्तस्य देवताभिः संसारसंवत्सरोऽश्वजीवानां स्वरूपाणि प्रकाशितानीति तादृशं देवताः स्वयमेवानुगृह्णन्तीति दर्शितं ३२ क
थवानुसंदध्महे गत इति ३३ स्रोतोभ्यः शरीरच्छिद्रेभ्यः ३४ उपधूपिते धूमेन व्याप्ते ३५ ३६ ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥

३७ आवापयंतीदं तपत्रिकयावेणीरूपेणसंग्रथनंकेशानांकारयंती ३८ यदिकुर्णनागतः स्यात्तर्हिआनागमिन्यपराधाभावेपिमयाशप्तः स्यादस्यर्थः ३९ श्रेयस्त्वत्तानंतिसिद्धिंत्रणिमाद्यैश्वर्यं ४० ४२

ततएनंचिंतयानमेवसपुरुषउवाच उत्तंकएनमेवाश्वमधिरोहक्षणेनैवोपाध्यायकुलंप्रापयिष्यतीति ३७ सतथेत्युक्त्वातमश्वमधिरुह्यप्रत्याजगामोपाध्यायकु
लं उपाध्यायपत्नीचस्नाताकेशानावापयंतीउपविष्टोत्तंकोनागच्छतीतिशापायास्यमनोदधे ३८ अथैतस्मिन्नंतरेसउत्तंकः प्रविश्यउपाध्यायगृहेउ
पाध्याय[illegible]पत्नीमभ्यवादयत्तेचास्याः कुंडलेप्रायच्छत्साचैनंप्रत्युवाच उत्तंकदेशेकाले ऽभ्यागतोसिस्वागतंतेवत्सत्वमनागसिमयानश
प्तः ३९ श्रेयस्तवोपस्थितंसिद्धिंप्राप्नुहीति ४० अथोत्तंकउपाध्यायमभ्यवादयत्तमुपाध्यायः प्रत्युवाचवत्सोत्तंकस्वागतंते।किंचिरंकृतमिति ४१
तमुत्तंकउपाध्यायंप्रत्युवाच। भोस्तक्षकेननागराजेनविघ्नः कृतोस्मिन्कर्मणितेनास्मिनागलोकंगतः तत्रचमयादृष्टेस्त्रियौतंत्रेअधिरोप्यपटं
वयंत्यौ तस्मिंश्चसिताः कृष्णाश्चतंतवः ४२ किंतत्तत्रमयाचक्रंदृष्टंद्वादशारंषट्चैनंकुमाराः परिवर्तयंतितदपिकिंपुरुषश्चापिमयादृष्टः स
चापिकः अश्वश्चातिप्रमाणोदृष्टः सचापिकः ४३ पथिगच्छताचमयाऋषभोदृष्टः तंचपुरुषोधिरूढस्तेनास्मिसोपचारमुक्तः उत्तंकास्यऋ
षभस्यपुरीषंभक्षय उपाध्यायेनापितेभक्षितमिति ४४ ॥ ॥ ॥ ॥ ॥छ

एवंस्वपंदृष्टंतत्वतोज्ञात्वास्वस्तंचार्थआचार्याद्वेदविद्यासाधिष्टंप्रापदितिश्रुतेराचार्यमत्स्वादरीकर्तुमुत्तंकः पृच्छतितत्रवेसादिता ४२ ४३ सोपचारंसानुनयः ४४ ॥ ॥

४६ येते इति। पूर्ववत्। धाता ऐश्वरी माया। विधाता जीवाविद्या। रात्रिरधर्मवासना तत्त्वावरकत्वात्। अहः धर्मवासना तत्त्वप्रकाशकत्वात्। शेषं तंत्रं चेदमिमं नः स्वयं वज्ञातमित्याशयेनोक्तं। चक्रं विहगोति पदयोति।
पर्जन्य इंद्रः पर्जन्यो मघवा वृषा हरिहयः प्राचीनबर्हिर्हरिरितियादवः पर्जन्यत्वं धारणाकारणत्वात्सर्जन्यईश्वरः अग्निः घृता पतिर्विराडात्मा: ४७ इराः अन्नं तद्वानिरावान् पक्षः तज्जो धर्मैरावतः स

धाताविर[?]

ततस्तस्य वचनान्मया तदृषभस्य पुरीषमुपयुक्तं सचापि कस्तदेतद्भगवतोपदिष्टमिच्छेयं श्रोतुं किंतदिति ४५ सतेनैवमुक्तउपाध्यायः प्रत्युवाच ४६ येते स्त्रियौधाताविधाता येचते सिताः कृष्णाश्चतंतवस्तेरात्र्यहनी यदपितच्चक्रं द्वादशारं षट्कुमाराः परिवर्तयंतितेपिषड्ऋतवः संवत्सरश्चक्रं यः पुरुषः सपर्जन्यो योश्वः सोग्निः ४७ यऋषभस्त्वयापथिगच्छतादृष्टः सऐरावतोनागराट् यश्चैनमधिरूढः पुरुषः सचेंद्रः यदपितेभक्षितंतदृषभस्य पुरीषंतदमृतं ४८ तेनखल्वसितस्मिन्नागभवनेनव्यापन्नस्त्वं सहिभगवानिंद्रोममसखात्वदनुक्रोशादिममनुग्रहंकृतवान् तस्मात्कुंडलेगृहीत्वापुनरागतोसि ४९ तत्सौम्यगम्यतामनुजानेभवंतंश्रेयोवाप्स्यसीति सउपाध्यायेनानुज्ञातोभगवानुत्तंकः क्रुद्धस्तक्षकंप्रतिचिकीर्षमाणोहास्तिनपुरंप्रतस्थे ५० ॥

चनागराडिवश्रवकंपः शेषमुक्तार्थः ४८ नव्यापन्नः नमृतः ममजीवस्य मखा इंद्रः परमेश्वरः सहिसर्वेषामंतरात्मत्वात्सखा। सर्वान्स्वधर्मस्थाननुगृह्णातीत्याख्यायिकातात्पर्यं। खलोन प्रार्थना
साध्यः सर्वैर्देवेनदंडितः अभेतिमिदंतां पश्चादुत्तंकेतक्षकोयथा॥ ४९ प्रतिचिकीर्षमाणः हेतौ शानच् तक्षकं बाधितुमिच्छुः ५० ॥ ॥ ॥ ॥

५२ पुरोतिहर्षकालेराजानमर्घयेतेतिभावः ५३ शब्दानइतिशब्दोर्थः तेनसंपन्नया विशिष्टार्थवत्या ५३ ५८ विधिदृष्टस्यवेदविदितस्यकर्मणः सर्पसत्रस्यकार्यकालंक्रियाप्रस्तावं अपचि[illegible]तिं

महात्मिनपांप्राप्यनविप्राद्दिप्रसत्तमः समागच्छतराजानंउत्तंकोजनमेजयं ५१ पुरातक्षशिलातःसंनिवृत्तमपराजितं सम्यग्विजयिनंदृष्ट्वासमंतान्मंत्रिभिर्वृतं ५२ तस्मैजयाशिषःपूर्वंयथान्यायंप्रयुज्यसः उवाचैनंवचःकालेशब्दसंपन्नयागिरा ५३ उत्तंकउवाच अन्यस्मिन्करणीयेतुकार्येपार्थिवसत्तम बाल्यादिवान्यदेवत्वंकुरुषेनृपसत्तम ५४ सौतिरुवाच एवमुक्तस्तुविप्रेणसराजाजनमेजयः अर्चयित्वायथान्यायंप्रत्युवाचद्विजोत्तमं ५५ जनमेजयउवाच आसांप्रजानांपरिपालनेनस्वंक्षत्रधर्मंपरिपालयामि प्रब्रूहिमेकिंकरणीयमद्ययेनासिकार्येणसमागतस्त्वं ५६ सौतिरुवाच सएवमुक्तस्तुनृपोत्तमेनद्विजोत्तमःपुण्यकृतांविशिष्टः उवाचराजानमदीनसत्त्वंस्वमेवकार्यंनृपतेकुरुष्व ५७ उत्तंकउवाच तक्षकेणमहींद्रेंद्रयेनतेहिंसितःपिता तस्मैप्रतिकुरुष्वत्वंपन्नगायदुरात्मने ५८ कार्यकालंहिमन्येहंविधिदृष्टस्यकर्मणः तद्गच्छापचितिंराजन्पितुस्तस्यमहात्मनः ५९ तेनह्यनपराधीसदष्टोदुष्टांतरात्मना पंचत्वमगमद्राजावज्राहतइवद्रुमः ६० बलदर्पसमुत्सिक्तस्तक्षकःपन्नगाधमः अकार्यंकृतवान्पापोयोदशत्पितरंतव ६१ राजर्षिवंशगोप्तारममरप्रतिमंनृपं पिपासंकाश्यपंचैवन्यवर्तयतपापकृत ६२ होतुमर्हसितंपापंज्वलितेहव्यवाहने सर्पसत्रेमहाराजत्वरितंतद्विधीयतां ६३ ॥ ॥ ॥ ॥ ॥ ॥

आनृण्यं ५९ ६० ६१ नृपंप्रतिपिपासंहंतुमिच्छुंकाश्यपंविषहरविद्याविदंन्यवर्तयत धनंदत्वापरावर्तितवान्पापंहोतुमर्हसीत्युत्तंकेणसंबंधः ६२ ६३ ॥ ॥

६५ वाक्यहविषा वाक्यरूपेणोद्दीपकेनाहविषा घृतादिना ६६ ६७ वृत्तंमतं वृत्तोनीतेदृढेस्थानेवर्तुलेपिमतेवृत्तइतिविश्वः तदृक्वविशेषेणातिशेषः ६८ इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्ध
रवंशावतंसश्रीगोविंदसूरिसूनोर्नीलकंठस्यकृतौभारतभावदीपेआदिपर्वणिपौष्यपर्वप्रकाशस्तृतीयोध्यायः एवंकृतोयाहूंतंभारतमारतेलोमहर्षणाइसादि १ पुराणंपुराणपंजीविकास्येतिविग्रहेमा
भृदित्याशयेनाहपुराणोक्तकृतश्रमइति। अयंभावः ब्राह्मण्यांक्षत्रियात्सूतइतिस्मृत्युक्तः। विलोमजःजातिसूतः संजयाधिरथादिरन्यः पस्सूतीविकासार्थ्यंवाउग्रणाराज्ञांशौर्योत्पादिप्रकाश
तेनस्वामिद्रोत्साहनेन। अतएवास्यपौराणिकइतिसंज्ञाउग्रश्रवास्तुसौतिरेवनजातिसूतः तथात्वेत्वापिसूतशद्वयोगोपपत्तेः सौतिरितिअपत्यार्थप्रत्ययानर्थक्यंस्यात्। किंतर्हिअग्निकुं

एवंपितुस्त्वापचितिंकृतवांस्त्वंभविष्यसि ममप्रियंचसुमहत्कृतंराजन्भविष्यति ६४ कर्मणःपृथिवीपालममयेनदुरात्मना। विघ्नःकृतोमहाराजगुर्वर्थंचै
रतोऽनघ ६५ सौतिरु० च एतच्छ्रुत्वातुनृपतिस्तक्षकायचुकोपह उत्तंकवाक्यहविषादीप्तोग्निर्हविषायथा ६६ अपृच्छत्सतदाराजामंत्रिणःस्वान्सु
दुःखितः उत्तंकस्यैवसांनिध्येपितुःस्वर्गगतिंप्रति ६७ तदैवहिसराजेंद्रोदुःखशोकाप्लुतोभवत् यदैववृत्तंपितरमुत्तंकादशृणोत्तदा ६८ इतिश्री
भा महाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांआदिपर्वणिपौष्यंसमाप्तंतृतीयोध्यायः लोमहर्षणपुत्रउग्रश्रवाःसौतिः पौराणिकोनैमिषारण्येशौन आ० ४
कस्यकुलपतेर्द्वादशवार्षिकेसत्रेऋषीनभ्यागतानुपतस्थे १ पौराणिकः पुराणेकृतश्रमः सकृतांजलिरुवाच किंभवंतःश्रोतुमिच्छंतिकिमहंब्रुवा

उसमुद्भूतस्तन्निर्मलमानसेतिलोमहर्षणांप्रतिशौनकस्यवचनस्यपुराणांतरेदर्शनात् अग्निजोलोमहर्षणःसूतः तस्यचब्राह्मणासंकल्पात्तत्र्ब्रह्मासनार्हत्वंश्रूयतेउत्य सत्क्षत्रियत्ववत्। ब्रह्मासना
र्हत्वंवैशंपायनशांतनवमार्कंडेयादितुल्यत्वंसजातीयएवार्हतिनहीनः नहिमहांतःशौनकादयोहीनासरणेहसंज्ञगच्छेरितिवक्तुयुक्तं। नहीनतः पौम्यादद्दीतेतिन्यायेनैवतन्निषेधात्। नीचादप्युत्त
माविद्यांआददीतेतिस्यायश्चापद्विषयमेतत्। अतएवतद्धासउद्दांमेणाब्रह्महत्याव्रतंवाणमितिस्मर्यते। तत्रसूतशद्वस्तुकथाप्रवक्तृत्वसामान्यात् तस्माद्ब्राह्मणएवपुराणप्रवक्तृत्वेनवरणीयःश्रोतकामि
र्नहीनः तस्मात्सौराणिकपदनजातिसूतपरंअपितुपुराणाध्येतृब्राह्मणपरमिति॥ २ ॥ म२ ॥ ॥ ॥

हेलोमहर्षणि वयं त्वां परमं ब्रूहीति वक्ष्यामस्त्वया तु सम्यक् परमं ब्रह्मलं चनीत्स्मात्प्रतिवचो वक्ष्यसि। कथाः शंबरः योगे योगविषये कथाः शुश्रूषतां श्रोतुमिच्छतां नोऽस्माकं त्वमस्माकं संबंधिनीनां कथानां
[illegible]योगः संबंधोपस्थितस्तत्र ३ अग्निशरणमग्निगृहं ४ देवतासुराणां तासुमितिशेषः ५ शास्त्रे कर्मकांडे आरण्यके ज्ञानकांडे ६ प्रतिपाल्यतां प्रतीक्ष्यतां ७ ९ वाग्भिर्वेदेन

तमृषयऊचुः परमं लोमहर्षणे वक्ष्यामस्त्वां नः प्रतिवक्ष्यसि वचः शुश्रूषतां कथायोगं नः कथायोगे ३ तत्र भगवान्कुलपतिस्तु शौनकोऽग्निशरणमध्यास्ते
४ योसौ दिव्याः कथावेद देवतासुरसंश्रिताः मनुष्योरगगंधर्वकथावेदेह सर्वशः ५ स चाप्यस्मिन्मखे सौते विद्वान्कुलपतिर्द्विजः दक्षो धृतव्रतो धीमान्
शास्त्रे चारण्यके गुरुः ६ सत्यवादी शमपरस्तपस्वी नियतव्रतः सर्वेषामेव नो मान्यः स तावत्प्रतिपाल्यतां ७ तस्मिन्नध्यासति गुरावासनं परमार्चितं
ततो वक्ष्यसि यत्त्वां स प्रक्ष्यति द्विजसत्तमः ८ सौतिरु० च एवमस्तु गुरौ तस्मिन्नुपविष्टे महात्मनि तेन पृष्टः कथाः पुण्या वक्ष्यामि विविधाश्रयाः ९
सोथ विप्रर्षभः सर्वं कृत्वा कार्यं यथाविधि देवान्वाग्भिः पितॄनद्भिस्तर्पयित्वाजगाम ह १० यत्र ब्रह्मर्षयः सिद्धास्त आसीना यतव्रताः यज्ञा
यतनमाश्रित्य सूतपुत्रपुरःसराः ११ ऋत्विक्ष्वथ सदस्येषु स वै गृहपतिस्ततः उपविष्टेषूपविष्टः शौनकोथाब्रवीदिदं १२ इत्यादिपर्वणि कथो
पन्यासः ४ शौनक उ० च पुराणमखिलं तात पिता तेऽधीतवान्पुरा कच्चित्त्वमपि तत्सर्वमधीषे लोमहर्षणे २ पुराणे हि कथा दिव्या आदिवं
शाश्च धीमतां कथ्यंते तत्पुरास्माभिः श्रुतपूर्वं पितुस्तव ३ तत्र वंशमहं पूर्वं श्रोतुमिच्छामि भार्गवं कथयस्व कथामेतां कल्याः स्म श्रवणे तव ३ ॥६

यद्वा धीते यथस्थाकृतिभिर्वतदेवतास्तर्पयतीत्यादिस्मृतेः आजगाम मेतिच्छेदः १० ११ १३ अध्यायः पुराणं पूर्ववृत्तं १ पूर्वं अनादिकालवृत्तं २ कल्याः समर्थाः तव त्वत्तः श्रोतुमिति

कथितंमत्वमितिशेषः ४ ततः पितुः सकाशात्तमयापदधीतमिसावर्न्नीयं ५ पुराणाश्रयपउपोद्घातनेनसंयुतं ६ १७ नियतः शमादिमान् नियताशनः हिंसितमेध्याशन निश्च १८

सौतिरुवाच यदधीतंपुरासम्यग्द्विजश्रेष्ठैर्महात्मभिः वैशंपायनविप्राद्यैस्तैश्चापिकथितंयथा ४ यदधीतंचपित्रामेसम्यक्चैवततोमया तत्तावच्छृणुयो
देवैः सेंद्रैः सर्षिमरुद्गणैः पूजितः प्रवरोवंशोभार्गवोभृगुनंदन ५ इमंवंशमहंपूर्वंभार्गवंतेमहामुने निगदामियथायुक्तंपुराणाश्रयसंयुतं ६ भृगु
२ र्महर्षिर्भगवान्ब्रह्मणावैस्वयंभुवा वरुणस्यक्रतौजातः पावकादितिनःश्रुतं ७ भृगोः सुदयितः पुत्रश्च्यवनोनामभार्गवः च्यवनस्यचदायादः प्रमति
र्नामधार्मिकः ८ प्रमतेरप्यभूत्पुत्रोघृताच्यांरुरुरित्युत रुरोरपिसुतोजज्ञेशुनकोवेदपारगः ९ प्रमद्वरायांधर्मात्मातवपूर्वपितामहः तपस्वीचयशस्वीच
श्रुतवान्ब्रह्मवित्तमः धार्मिकः सत्यवादीचनियतोनियताशनः १० शौनकउवाच सूतपुत्रयथातस्यभार्गवस्यमहात्मनः च्यवनत्वंपरिख्यातंत
न्ममाचक्ष्वपृच्छतः ११ सौतिरुवाच भृगोः सुदयिताभार्यापुलोमेत्यभिविश्रुता तस्यांसमभवद्गर्भोभृगुवीर्यसमुद्भवः १२ तस्मिन्गर्भेऽथसंभू
तेपुलोमायांभृगूद्वहः समयेसमशीलिन्यांधर्मपत्न्यांयशस्विनः १३ अभिषेकायनिष्क्रांतेभृगौधर्मभृतांवरे आश्रमंतस्यरक्षोऽथपुलोमाभ्या
जगामह १४ तंप्रविश्याश्रमंदृष्ट्वाभृगुभार्यामनिंदितां हृच्छयेनसमाविष्टोविचेताः समपद्यत १५ अभ्यागतंतुतद्रक्षःपुलोमाचारुद
र्शना न्यमंत्रयतवन्येनफलमूलादिनातथा तांतुरक्षस्तदाब्रह्मन्हृच्छयेनाभिपीडितां दृष्ट्वाहृष्टमभूद्राजन्जिहीर्षुस्तामनिंदिता १७ ॥ ॥

हृच्छयेनकामेन १७ श्रीराम॥ ॥ ॥ ११ ॥ ॥ ॥ ॥ ॥ ॥ ॥

कथंपरदारेषुकामःसत्यमाहसाहीति।पूर्वंबाल्येमेपित्रादत्तारक्षःनामग्रहणेसविधिनापुलोम्नेदत्तावाचैवनदत्ता।पश्चात्तुविधिवद्भृगवेपिताप्रादात् १८ १९ स्वगणैःकन्यापितरंस्वनन्दं
कारयतीतितस्मैअनृतकारिणेतथाचस्मृतिःदत्तामपिहरेत्कन्यांश्रेयांश्चेद्वरआव्रजेदिति।वक्तृत्ववरलोभादिति २२ वरारोहाश्रेष्ठनितम्बा २३ २४ शंकमानंवाचामस्य

कृतमित्यब्रवीदेनांविजिहीर्षुर्मनसाशुभां साहिपूर्ववृतातेनपुलोम्नात्वशुचिस्मिता तांतुप्रादात्पितापश्चाद्भृगवेविधिवत्तदा १८ तस्यतत्किल्बिषं नित्यंहृदिवर्ततिभार्गव इदमन्तरमित्येवंहर्तुंचक्रेमनस्तदा १९ अथाग्निशरणेपश्यज्ज्वलन्तंजातवेदसं तमपृच्छत्ततोरक्षः पावकंज्वलितंतदा २० शंसमेकस्यभार्येयमग्नेपृष्टऋतेनवै मुखंत्वमसिदेवानांवदपावकपृच्छते २१ मयाहीयंवृतापूर्वंभार्यार्थेवरवर्णिनीपश्चादिमांपिताप्रादाद्भृगवेऽनृतकारिणे २२ सेयंयदिवरारोहाभृगोर्भार्यारहोगता तथासत्यंसमाख्याहिजिहीर्षाम्याश्रमादिमां २३ समन्युस्तत्रहृदयंप्रदहन्निवतिष्ठति मत्पूर्वभार्यांयदिमांभृगुरापसुमध्यमां २४ सौतिरुवाच एवंरक्षस्तमामन्त्र्यज्वलितंजातवेदसं शंकमानंभृगोर्भार्यांपुनःपुनरपृच्छत २५ त्वमग्नेसर्वभूतानामन्तश्चरसिनित्यदा साक्षिवत्पुण्यपापेषुसत्यंब्रूहिकवेवचः २६ मत्पूर्वापहृताभार्याभृगुणानृतकारिणा सेयंयदितथामेत्वंसत्यमाख्यातुमर्हसि २७ श्रुत्वात्वत्तोभृगोर्भार्यांहरिष्याम्याश्रमादिमां जातवेदःपश्यतस्तेवदसत्यांगिरंमम २८ सूतउ च तस्यैतद्वचनंश्रुत्वासप्तार्चिर्दुःखितोभृशं भीतोऽनृताच्चशापाच्चभृगोरित्यब्रवीच्छनैः २९ ॥ ॥छ

रक्षसाभार्गवेविधिनादत्तेसत्यपिकिंश्रेष्ठमितिसंशयाऽनयदितिइत्येति।मत्पूर्वासावेत्भृगुणानृतकारिणेवेत्यर्हितथासत्यंब्रूहि २७ २८ भृगोरित्यत्रकोऽन्वितंस्यात्।पूर्वंरक्षसातस्याःपरिगृहीतत्वात्।रक्षस
इत्युक्तेभृगुतःशापभयं २९ ॥ ॥ ॥ ॥ ॥ ॥

३२ सेयमिति या त्वया पूर्वं वृता सेयं त्वदीयैवेयमित्यर्थः ३३ अध्यायः ५ वैधवाचिकदानयोर्वैधमेव बलवत् । तस्य वाचाकर्मणोश्च द्वयं च नं कुर्वाणो अग्निः पुलोमानौ शापं मरणं च क्रमात्प्राप्नुयात् अतो विधि

अग्निरु० च त्वया वृता पुलोमेयं पूर्वं दानवनंदन किंत्वियं विधिना पूर्वं मंत्रवन्न हृता त्वया ३० पित्रा तु भृगवे दत्ता पुलोमेयं यशस्विनी ददाति न तवे
त्स्यं वरलोभान्महायशाः ३१ अथेमां वेददृष्टेन कर्मणा विधिपूर्वकं भार्यामृषिर्भृगुः प्राप मां पुरस्कृत्य दानव ३२ सेयमित्यवगच्छामि नानृ
तं वक्तुमुत्सहे नानृतं हि सदा लोके पूज्यते दानवोत्तम ३३ इत्यादिपर्वणि पौलोमे पंचमोध्यायः ५ सौतिरु० च अग्नेरथ वचः श्रुत्वा तद्र
क्षः प्रजहार तां ब्रह्मन्वराहरूपेण मनोमारुतरंहसा १ ततः स गर्भो निवसन्कुक्षौ भृगुकुलोद्वह रोषान्मातुश्च्युतः कुक्षेश्च्यवनस्तेन सोभ
वत् २ तं दृष्ट्वा मातुरुदराच्च्युतमादित्यवर्चसं तद्रक्षो भस्मसाद्भूतं पपात परिमुच्य तां ३ सा तमादाय सुश्रोणी ससार भृगुनंदनं च्यवनं भार्गवं पुत्रं
पुलोमा दुःखमूर्छिता ४ तां ददर्श स्वयं ब्रह्मा सर्वलोकपितामहः रुदतीं बाष्पपूर्णाक्षीं भृगोर्भार्यामनिंदितां ५ सांत्वयामास भगवान्वधूं ब्रह्मा
पितामहः अश्रुबिंदूद्भवा तस्याः प्रावर्तत महानदी आवर्तंती सृतिं तस्याः भृगोः पत्न्या यशस्विनः ६ तस्या मार्गं सृतवतीं दृष्ट्वा तु सरितं तदा ना
म तस्यास्तदा नद्याश्चक्रे लोकपितामहः वधूसरेति भगवांश्च्यवनस्याश्रमं प्रति ७ स एवं च्यवनो जज्ञे भृगोः पुत्रः प्रतापवान् तं ददर्श पिता तत्र च्यव·

मौलं घनीयः स्वाशयेन षष्ठमध्यायमारभते अग्नेरथेति २ तेन च्यावेति योगेन २ ५ सृतिं मार्गं अनु आवर्तमाना ६ ॥ ॥ ॥ ॥ ॥

मद्भूर्यादृयंममैवमार्यानितभ्रगोरिसेवंरूपेणत्वांज्ञोनवेदेसर्थः तवेयंभार्येतिकेनकथितासि १० १४ अध्यायःषष्टः शसं १ ससंयथार्थ्यससंपक्षपातहीनंव्यभिचारोयथः २ ३ ४ ५ योगेनपो

सपुलोमांततोभार्यायप्रच्छकुपितोभृगुः केनासिरक्षसेतस्मैकथितात्वंजिहीर्षते नहित्वांवेदतद्रक्षोमद्भार्यांचारुहासिनी १० तत्त्वमाख्याहितं त्वद्य शप्तुमिच्छाम्यहंरुषा बिभेतिकोनशापान्मेकस्यचायंव्यतिक्रमः ११ पुलोमा च अग्निनाभगवंस्तस्मैरक्षसेहंनिवेदिता ततोमामनयद्रक्षः क्रोशंतींकुररीमिव १२ साहंतवसुतस्यास्यतेजसायस्मिोक्षिता भस्मीभूतंतुतद्रक्षोमामुत्सृज्यपपाततवै १३ इतिश्रुत्वापुलोमायाभृगुः परममन्युमान शशापाग्निमतिक्रुद्धः सर्वभक्षोभविष्यसि १४ इत्यादिपर्वणिपौलोमेग्निशापः शप्तस्तुभृगुणावह्निः क्रुद्धोवाक्यमथाब्रवीत किमिदंसाहसंब्रह्मन्कृतवानसिमांप्रति १ धर्मेप्रयतमानस्यसत्यंचवदतः समं पृष्टोयदब्रुवंसत्यंव्यभिचारोत्रकोमम पृष्टोहिसाक्षीयःसाक्ष्यंजानानोप्यन्यथावदेत सपूर्वानात्मनःसप्तकुलेहन्यात्तथापरान ३ यश्च कार्यार्थतत्त्वज्ञोजानन्नपिनभाषते सोपितेनैवपापेनलिप्यतेनात्रसंशयः ४ शक्तोहमपिशप्तुंत्वांमान्यास्तुब्राह्मणाममम जानतोपिचतेव्रह्मन्कथयिष्येनिबोधतत ५ योगेनबहुधात्मानंकृत्वातिष्ठामिमूर्तिषु अग्निहोत्रेषुसत्रेषुक्रियासुचमखेषुच ६ वेदोक्तेनविधानेनमयियद्धूयतेहविः देवताः पितरश्चैवतेनतृप्ताभवन्ति ७ ८

गवलेन मूर्तिषुगार्हपत्यादिमंडलेषु। अस्मदादिशरीरेषुवा। सत्रेषुबहुकर्तृकेषुक्रतुविशेषेषु। क्रियासुस्मार्तासुमखेषुसोमादिषु ६ ॥ श्रीरामोजयति ॥ ॥ ७ ॥ ७

आपसोमात्मपयः पभूतयोऽग्नौहूयमानाः देवपितृतृप्ताः आपः पुरुषवचसोमवतीतिश्रुतेरग्नौहुताआपएवदेवताशरीररूपेणपरिणमंतइत्यर्थः ८ अत्रैकयोनित्वाच्चदेवादीनामन्योन्यात्मकत्वमनूद्य

आपोदेवगणाः सर्वे आपः पितृगणास्तथा दर्शश्चपौर्णमासश्चदेवानांपितृभिः सह ८ देवताः पितरस्तस्मात्पितरश्चापिदेवताः एकीभूता
श्चपूज्यंतेपृथक्त्वेनचपर्वसु ९ देवताः पितरःश्चैवभुंजतेमपिपृथक्हुतं देवतानांपितॄणांचमुखमेतदहंस्मृतं अमावास्यांहिपितरः पौर्णमा
स्यांहिदेवताः म[illegible]न्मुखेनैवहूयंतेभुंजतेवहुतंहविः देवताः पितरश्चैवभुंजतेचहुतंहविः सर्वभक्षः कथंतेषांभविष्यामिमुखंत्विहं ॥ सौतिरुवाच
चिंतयित्वाततोवह्निश्चक्रेसंहारमात्मनः द्विजानामग्निहोत्रेषुयज्ञसत्रक्रियासुच १२ निरोंकारवषट्काराः स्वधास्वाहाविवर्जिताः विनाग्निना
प्रजाः सर्वास्ततआसन्सुदुःखिताः १३ अथर्षयः समुद्विग्नादेवान्गत्वाब्रुवन्वचः अग्निनाशेक्रियाभ्रंशाद्भ्रांतालोकास्त्रयोनघाः विदध्व
मत्रयत्कार्यंनस्यात्कालात्ययोयथा १४ अथर्षयश्चदेवाश्चब्रह्माणमुपगम्यत अग्नेरावेदयंश्चापंक्रियासंहारमेवच भृगुणावैमहाभागश
प्तोग्निःकारणांतरे १५ कथंदेवमुखोभूत्वायज्ञभागाग्रभुक्तथा हुतभुक्सर्वभूतेषुसर्वभक्षत्वमेष्यति १६ श्रुत्वातत्तद्वचस्तेषामग्निमाहूय
विश्वकृत उवाचवचनंश्लक्ष्णंभूतभावनमव्ययं १७ लोकानामिहसर्वेषांत्वंकर्ताचांतएवच त्वंधारयसिलोकांस्त्रीन्क्रियाणांचप्रवर्त्त
कः १८ सतथाकुरुलोकेशनोच्छिद्येरन्क्रियायथा कस्मादेवंविमूढस्त्वमीश्वरःसन्हुताशन १९ ॥ ॥ ॥ ॥

कोमेवसाहदेवताइति ९ सतदेवाताइति १० आमावास्यांअमावास्यायां ॥ हूयंतेइज्यंते ११ संहारंतिरोभावं १२ १३ क्रियाभ्रंशात्अग्निहोत्रादिलोपात् १४ १६ भूतभावनंसर्वभूतहितंव

२० क्रव्यादामतमांसाशिनीतनुश्मशानाग्निः २२ स्वप्रभावाद्विनिर्गतं। शप्तोसन्निंध्रुतितंचैवकारणत्वात्स्वतोनिर्गतंशापंत्वंसत्यंकुर्वितिभावः तयोक्तंशिक्षायांआत्माबुद्ध्यासमेत्यार्थान्मनोयुंक्तेविवक्षयाम

त्वंपवित्रंसदालोकेसर्वलोकगतिस्तथा नत्वंसर्वशरीरेणसर्वभक्षत्वमेष्यसि २० अपानेत्वर्चिषोयास्तेसर्वंभक्ष्यंतिताःशिखिन क्रव्यादाचतनुर्याते सासर्वंभक्षयिष्यति २१ यथासूर्यांशुभिः स्पृष्टंसर्वंशुचिविभाव्यते तथात्वदर्चिर्निर्दग्धंसर्वंशुचिभविष्यति २२ त्वमग्नेपरमंतेजः स्वप्रभावाद्विनिर्गतं स्वतेजसैवतंशापंकुरुसत्यमृषेर्विभो २३ देवानांचात्मनोभागंगृहाणत्वंमुखेहुतं सौतिरु च एवमस्त्वितितंवह्निः प्रत्युवाचपितामहं जगामशासनंकर्तुंदेवस्यपरमेष्ठिनः २४ देवर्षयश्चमुदितास्ततोजग्मुर्यथागतं ऋषयश्चयथापूर्वंक्रियाः सर्वाःप्रचक्रिरे २५ दिविदेवामुमुदिरेँसंघाश्चलौकिकाः अग्निश्चपरमांप्रीतिमवापहतकल्मषः २६ एवमेषपुरावृत्तइतिहासोग्निशापजः पुलोम्नश्चविनाशश्चच्यवनस्यचसंभवः २७ इत्यादिपर्वणिपौलोमे ७ सूतउ च सचापिच्यवनोब्रह्मन्भार्गवोजनयत्सुतं॥ सुकन्यायांमहात्मानंप्रमतिंदीप्ततेजसं १ प्रमतिस्तुरुरुंनामघृताच्यांसमजीजनत रुरुः प्रमद्वरायांतुशुनकंसमजीजनत २ तस्यब्रह्मन्रुरोः सर्वंचरितंभूरितेजसः विस्तरेणप्रवक्ष्यामितच्छृणुत्वमशेषतः ३ ऋषिरासीन्महान्पूर्वंतपोविद्यासमन्वितः स्थूलकेशइतिख्यातः सर्वभूतहितेरतः ४ एतस्मिन्नेवकालेतुमेनकायांप्रजज्ञिवान॥ ॥ ॥ ॥ ॥ ॥

सूत २

नःक्वापाग्निमाहुर्तिमग्नेरेपतिमाहूतं।माहुतत्तरसिचारुमंद्रंजनयतिस्तारामित्यादि २३ २७ ससमोध्यायः सचापीति २४ प्रजज्ञिवानुत्पादितवान ५ ॥ ॥ ॥ ६७

१ भगदैवते पूर्वयोः फल्गुन्योरिति लौकिकाः फल्गुनी नक्षत्रमर्यमादेवता फल्गुनी नक्षत्रं भगो देवतेति श्रुतेरुत्तराफल्गुन्योर्वा विवाहं स्थापयित्वा निश्चित्य पाणिग्रहणस्यागे वा अग्रे त्वरा स्वीकृत भार्यया विना

गंधर्वराजो विप्रर्षे विश्वावसुरिति स्मृतः ५ अप्सरा मेनका तस्मिन् गंधर्वराजे भृगुनंदन उत्ससर्ज यथाकालं केशाश्रमं प्रति ६ उत्सृज्य चैव तं गर्भं न
द्यास्तीरे जगाम ह अप्सरा मेनका ब्रह्मन्निर्दया निरपत्रपा ७ कन्याममरगर्भाभां ज्वलंतीमिव च श्रिया तां ददर्श समुत्सृष्टां नदीतीरे महानृषिः
८ स्थूलकेशः स तेजस्वी विजने बंधुवर्जितां स दृष्ट्वा तां तदा कन्यां स्थूलकेशो महाद्विजः जग्राह च द्विजश्रेष्ठः कृपाविष्टः पुपोष च ववृधे सा व
रारोहा तस्याश्रमपदे शुभे १० जातकाद्याः क्रियाश्चास्या विधिपूर्वं यथाक्रमं स्थूलकेशो महाभागश्चकार स महानृषिः ११ प्रमदाभ्यो वरा
सा तु सत्वरूपगुणान्विता ततः प्रमद्वरेत्यस्या नाम चक्रे महानृषिः १२ तामाश्रमपदे तस्य रुरुर्दृष्ट्वा प्रमद्वरां बभूव किल धर्मात्मा मदनानु
गतात्मवान् १३ पितरं सखिभिः सोऽथ श्रावयामास भार्गवं प्रमतिश्चाभ्ययाचत्तां स्थूलकेशं यशस्विनं १४ ततः प्रादात्पिता कन्यां रुर
वे तां प्रमद्वरां विवाहं स्थापयित्वाग्रे नक्षत्रे भगदैवते १५ ततः कतिपयाहस्य विवाहे समुपस्थिते सखीभिः क्रीडती सार्द्धं सा कन्या वर
वर्णिनी १६ नापश्यत्संप्रसुप्तं वै भुजंगं तिर्यगायतं पदा चैनं समाक्रामन्मुमूर्षुः कालचोदिता १७ स तत्तस्याः प्रमत्तायाश्चोदितः का
लधर्मणा विषोपलिप्तान्दशनान्भृशमंगे न्यपातयत् १८ ॥ ॥

ऌ

शेन रुरोर्ईः स्वंभ्राप्तुर्नाशे भूतद्रोहस्य प्रसक्तस्य साव्यापिकानां सर्पयैश्च होकरुष्टं दासं प्रहरति १५ १६ १७ कालधर्मणा मृत्युना १८ ॥ ॥ ॥ ७

२९ व्यसुर्विगतप्राणाः २० २५ इसस्मः नेषुमहामहिम्नामप्याधुषकृणातोदुर्लभइसध्यायतासर्यः १ चिंसविचिंस २ ० २ ० २ ० २ ० २

सादष्टातेनसर्पेणपपातसहसाभुवि विवर्णाविगतश्रीकाभ्रष्टाभरणचेतना १९ निरानंदकरीतेषांबंधूनांमुक्तमूर्द्धजा व्यसुरप्रेक्षणीयासाप्रेक्षणीयतराऽभवत् २० प्रसुप्तेवाभवच्चापिभुविसर्पविषार्दिता भूयोमनोहरतराबभूवतनुमध्यमा २१ ददर्शतांपिताचैवतेचैवान्येतपस्विनः विचेष्टमानांपतितांभूतलेपद्मवर्चसं २२ ततः सर्वेद्विजवराः समाजग्मुः कृपान्विताः स्वस्त्यात्रेयोमहाजानुः कुशिकः शंखमेखलः २३ भरद्वाजोकौणकुत्सश्चार्ष्टिषेणोथगौतमः प्रमतिः सहपुत्रेणतथान्येवनवासिनः २४ तांतेकन्यांततोदृष्ट्वाभुजगस्यविषार्दितां रुरुदुः कृपयाविष्टारुरुस्त्वार्तो बहिर्ययौ २५ इत्यादिपर्वणिपौलोमे ८ सौतिरुवाच तेषुतत्रोपविष्टेषुब्राह्मणेषुमहात्मसु रुरुश्चुक्रोशगहनंवनंगत्वासुदुःखितः १ शोकेनाभिहितः सोथविलपन्करुणंबहु अब्रवीद्वचनंशोचन्प्रियांचिंत्यप्रमद्वरां २ शेतेसाभुवितन्वंगीममशोकविवर्द्धनी बांधवानांचसर्वेषां किंनुदुःखमतः परं ३ यदिदत्तंतपस्तप्तंगुरवोवामयायदि सम्यगाराधितास्तेनसंजीवतुममप्रिया ४ यथाचजन्मप्रभृतियतात्माहंधृतव्रतः प्रमद्वरातथाद्यैवसमुत्तिष्ठतुभामिनी ५ एवंलालप्यतस्तस्यभार्यार्थेदुःखितस्यच देवदूतस्तदाभ्येत्यवाक्यमाहरुरुंवने ६ देवदूतउवाच॥ अभिधत्सेहयद्वाचारुरोदुःखेनतन्मृषा नतुमर्त्यस्यधर्मात्मन्नायुरस्तिगतायुषः ७ गतायुरेषाकृपणागंधर्वाप्सरसोः सुता तस्माच्छोके मनस्तातमाकृथास्त्वंकथंचन ८ ॥ ॥ ॥ ॥ ॥ ॥

श्रीरामोजयति ॥ ॥ ॥ ॥ ॥ ॥ ॥

रुरोरेवनान्यस्यदंपत्योरेकात्मकत्वात १५ १६ एतदृष्टमितिएतन्नरुरोरेवजातकेदृष्टंतान्येनकर्तुंशक्यमितिभावः १७ १८ महोतोपिकामोपघातेमहांतंद्रोहमाविष्टंवात्वाहमलब्धेति

उपायश्चात्रविहितः पूर्वैर्देवैर्महात्मभिः तंयदीच्छसिकर्तुंत्वंप्रास्यसीहद्विजमहूरां ९ रुरुरु च केपायः कृतोदेवैर्ब्रूहितत्त्वेनखेचर। करिष्ये

हंतथाश्रुत्वात्रातुमर्हतिनोभवान् १० देवदूतउ च आयुषोर्द्धंप्रयच्छत्वंकन्यायैभृगुनंदन एवमुत्थास्यतिरुरोतवभार्याद्विजमहूरा ११ रुरुरुवा

च आयुषोर्द्धंप्रयच्छामिकन्यायैखेचरोत्तम शृंगारस्याभरणाद्योत्तिष्ठतुद्विजमहूरा १२ सूतउ च ततोगंधर्वराजश्चदेवदूतश्चसत्तमौ धर्मराजमुपेत्से

देवचनंप्रत्यभाषतां १३ धर्मराजायुषोर्द्धेनरुरोर्भार्याद्विजमहूरा समुत्तिष्ठतुकल्याणीमृतेयंयदिमन्यसे १४ धर्मउ च प्रमद्वरांरुरोर्भार्यांदेव

दूतयदीच्छसि उत्तिष्ठत्वायुषोर्द्धेनरुरोरेवसमन्विता १५ सौतिरु च एवमुक्तेततः कन्यासोदतिष्ठत्प्रमद्वरा रुरोस्तस्यायुषोर्द्धेनसुप्तेववरवर्णिनी

१६ एतदृष्टंभविष्योहिरुरोरुत्तमतेजसः आयुषोतिप्रवृद्धस्यभार्यार्थेऽर्द्धमलुप्यत १७ ततइष्टेहनितयोः पितरौचक्रतुर्मुदा विवाहंतौरेमाते

परस्परहितैषिणौ सलब्ध्वादुर्लभांभार्यांपद्मकिंजल्कवर्चसं व्रतंचक्रेविनाशायजिह्मगानांधृतव्रतः। आभिहंतियथापन्नंगत्वप्रहरणंतदा २०

सकदाचिद्वनंविप्रोरुरुरभ्यागमन्महत् शयानंतत्रचापश्यत्डुंडुभंवयसान्वितं २१ ॥ ॥ ॥ ॥ ॥

व्रतंनियमं १९ गत्वप्रहरणं गत्वगृहीत्वा २० डुंडुभंनिर्विषंस्थूलसर्पं। वयसान्वितंवृद्धं २१ ॥ ॥ ॥ ॥ ॥

२२ संरंभात् आवेशात् २३ नवमः ममेति २४ अहिगंधेन सर्पसादृश्यमात्रेण ३ एकानर्थानिति। अनर्थो हानिः अर्थो लाभः अर्थः सुखं च कर्तृभोक्तृ भवति। अनर्थो दुःखं ...

ततउद्यम्य दंडं स कालदंडोपमं तदा जिघांसन्कुपितो विप्रस्तमुवाचाथ डुंडुभः २१ नापराध्यामि ते किंचिदहमद्य तपोधन संरंभाच्च किमर्थं मामभिहंसि रुषान्वितः २२ इत्यादिपर्वणि पौलोमे ९ रुरु च मम प्राणसमा भार्या दष्टासीद्भुजगेन ह तत्र मे समयो घोरस्त्वात्मनोरग वै कृतः १ हन्यां सदैव फणिनं यंयं पश्येयमित्युत ततोहं त्वां हनिष्यामि जीवितेनाद्य मोक्ष्यसे २ डुंडुभउ च अन्ये ते भुजगा विप्र ये दशंतीह मानवान् डुंडुभानहिगंधेन न त्वं हिंसितुमर्हसि ३ एकानर्थान्पृथगर्थानेकदुःखान्पृथक्सुखान् डुंडुभान्धर्मविद्भूत्वा न त्वं हिंसितुमर्हसि ४ रुरुउवाच इति श्रुत्वा वचस्तस्य डुंडुभस्य रुरुस्तदा नावधीद्भयसंविग्न ऋषिं मत्वाथ डुंडुभं ५ उवाच चैनं भगवान्रुरुः संशमयन्निव कामया भुजग ब्रूहि कोसि मां विक्रियां गतः ६ डुंडुभउ च अहं पुरा रुरो नाम्ना ऋषिरासं सहस्रपात् सोहं शापेन विप्रस्य भुजगत्वमुपागतः ७ रुरुरु च किमर्थं शप्तवान्क्रुद्धो विप्रः स भुजगोत्तम किंयंतं चैव कालं ते वपुरेतद्भविष्यति ८ इत्यादिपर्वणि पौलोमे १० डुंडुभउ च सखा बभूव मे पूर्वं खगमो नाम वै द्विजः भृशं संशितवाक्तोथ तपोबलसमन्वितः १ स मया क्रीडता बाल्ये कृत्वा तार्णं भुजंगमं अग्निहोत्रे प्रसक्तो सौ भीषितः प्रमुमोह वै २ लब्ध्वा च स पुनः संज्ञां मामुवाच तपोधनः निर्दहन्निव कोपेन सत्यवाक्संशितव्रतः ३ यथावीर्यस्त्वया सर्पः कृतोयं मद्बिभीषया तथावीर्यो भुजंगस्त्वं मम शापाद्भविष्यसि ४ ॥ ॥ ॥ ॥ ॥

यद्वधेन बहूनामधर्मविदः सकाशात् भवति। धर्मविन्नयस्य पापमधस्तव दंडं पातयतीसर्वः कामया इच्छया ६ दशमः सखेति। नर्मपूर्विका विप्रपीडा न कर्तव्या किमुत वाक्तत्रीसाध्यधर्मेणेत्याशयः ... पतास सर्पं तिग्मो नाम ... १ तार्णं तृणमयं २५

५ संभ्रमात्भयात ६ ८ नचिरात्शीघ्रं ९ १० ११ १२ १३ १४ १५ १६ यज्ञोहंसर्पसत्रवचनंश्रुतिरागच्छयोषिति अनागमामपिद्रोहः पौलोमेनिदितंत्रयं।परि

तस्मात्तेहंतपोवीर्यंजानन्नासंतपोधनः भृशमुद्विग्नहृदयस्तमवोचंवनौकसं ५ प्रणतः संभ्रमाच्चैवप्रांजलिः पुरतः स्थितः सखेतिहसतेदंते नर्मार्थंवैकृतंमया ६ क्षंतुमर्हसिमेब्रह्मन्शापोयंविनिवर्त्यतां सोथमामब्रवीद्दृष्ट्वाभृशमुद्विग्नचेतसं मुहुरुष्णंविनिःश्वस्यसुसंभ्रांतस्तपोधनः ७ नानृतंवैमयाप्रोक्तंभवितेदंकथंचन यत्तुवक्ष्यामितेवाक्यंशृणुतन्मेतपोधन ८ श्रुत्वाचहृदितेवाक्यमिदमस्तुतपोधन उत्पत्स्यतिरुरुर्नामप्रमतेरात्मजः शुचिः तंदृष्ट्वाशापमोक्षस्तेभवितानचिरादिव ९ सत्वंरुरुरितिख्यातःप्रमतेरात्मजोपिच स्वरूपंप्रतिपद्याहमद्यवक्ष्यामितेहितं १० सडौंडुभंपरित्यज्यरूपंविप्रर्षभस्तदा स्वरूपंभास्वरंभूयः प्रतिपेदेमहायशाः इदंचोवाचवचनंरुरुमप्रतिमौजसं अहिंसापरमोधर्मः सर्वप्राणभृतांवरः तस्मात्प्राणभृतः सर्वान्नहिंस्याद्ब्राह्मणः क्वचित् १२ ब्राह्मणः सौम्यएवेहजायंतेतिपराश्रुतिः वेदवेदांगवित्नामसर्वभूताभयप्रदः १३ अहिंसासत्यवचनंक्षमाचेतिविनिश्चितं ब्राह्मणस्यपरोधर्मोवेदानांधारणापिच १४ क्षत्रियस्यहियोधर्मः सहिनेष्यंतिवैतवदंडधारणमुग्रत्वंप्रजानांपरिपालनं तदिदंक्षत्रियस्यासीत्कर्मवैशृणुमेरुरो १६ जनमेजयस्यधर्मात्मन्सर्पाणांहिंसनंपुरा परित्राणंचभीतानांसर्पाणांब्राह्मणादपि १७ तपोवीर्यबलोपेताद्वेदवेदांगपारगात आस्तीकाद्द्विजमुख्याद्वैसर्पसत्रेद्विजोत्तम १८ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

वैदि २

त्राणंरक्षमितिशेषः परैर्हिंसमानानांब्राह्मणोरक्षेदेवनतुकंचिद्धिंस्यादितिभावः २७ २८ एकादशः इतिश्रीमहाभारतेआदिपर्वणिपौलोमेः ॥ ॥ ॥ ॥ ७

आ०
६३

कथमिति १३ नष्टं च्युदर्शनं यातं १६ इति भारतभावदीपे आदिपर्वणि सर्पसत्रप्रस्तावनापौलोमं च समाप्तं द्वादशोऽध्यायः पौलोमे निंदितो विवाहसंग्रहः पुत्रमात्रार्थकार्यो न तु भोगार्थमित्यास्तीक

वनं ३

रुरुरुवाच कथं हिंसितवान्सर्पान्स राजा जनमेजयः सर्पा वा हिंसितास्तत्र किमर्थं द्विजसत्तम १ किमर्थं मोक्षिताश्चैव पन्नगास्तेन धीमता आ
स्तीकेन तदाचक्ष्व श्रोतुमिच्छामि तत्त्वतः २ ऋषिरुवाच श्रोष्यसि त्वं रुरो सर्वमास्तीकचरितं महत् ब्राह्मणानां कथयतामित्युक्त्वांतरधीयत ३
सौतिरुवाच रुरुश्चापि वनं सर्वं पर्यधावत्समंततः तमृषिं नष्टमन्विच्छन्संश्रांतो न्यपतद्भुवि ४ स मोहं परमं गत्वा नष्टसंज्ञ इवाभवत तदृषेर्वच
नं तथ्यं चिंतयानः पुनः पुनः ५ लब्धसंज्ञो रुरुश्चापात्तदाचख्यौ पितुस्तदा पिता चास्य तदाख्यानं पृष्टः सर्वं न्यवेदयत ६ इत्यादिपर्वणि
सर्पसत्रप्रस्तावनं नाम पौलोमं समाप्तं॥ ॥शौनक उवाच किमर्थं राजशार्दूलः स राजा जनमेजयः सर्पसत्रेण सर्पाणां गतोंतं तद्वदस्व मे
निखिलेन यथातत्त्वं सौते सर्वमशेषतः १ आस्तीकश्च द्विजश्रेष्ठः किमर्थं जपतां वरः मोक्षयामास भुजगान्प्रदीप्ताद्वसुरेतसः २ कस्य पुत्रः
स राजासीत्सर्पसत्रं य आहरत् स च [illegible] द्विजातिप्रवरः कस्य पुत्रोभिधत्स्व मे ३ सूत उवाच महदाख्यानमास्तीकं यदेतत्प्रोच्यते द्विज सर्व
मेतदशेषेणाश्रण्यमेवदतांवर ४ ॥ ॥ ॥ ॥ ॥ ॥

पार[illegible]भते। किमर्थमित्यादिना वृत्तं तत्त्वं तत्कारणं १ जयतं जितेंद्रियाणां आराजाम अन्विच्छया सम्यक्तं सर्वतः पृथिवीं जपतां वरीयायेति ब्राह्मणानां तद्विषयैव जपतामिति वा। जपतामित्यपि पाठः २ आहरत्तकृतवान् ३

४
राम०
६८

९ यायावराणां ग्रामैकरात्रवासिनां गृहस्थानां। येभ्यो पंचयज्ञहोमसंप्रदायः प्रदायः प्रवर्त्तकः तथा च भरद्वाजः यायावरा नाम ब्राह्मणा आसंस्ते ऽर्द्धमासार्द्धमासा याग्निहोत्रमजुहुवन्निति १० यत्र सायंकालं तत्रैव गृहमस्येति यत्रसायंगृहः ११ दीक्षां व्रतस्वीकारं चरन्कुर्वन् १२ वायुभक्षः जितपवनः निराहारः आहारं आहार्यं विषयभोगस्तच्छून्यः अनिमेषो जितनिद्रः इतस्ततः पतितं शीर्ण

शौनकस्तु च श्रोतुमिच्छाम्यशेषेण कथामेतां मनोरमां आस्तीकस्य पुराणर्षेर्ब्राह्मणस्य यशस्विनः ५ सूतस्तु च इतिहासमिमं विप्राः पुराणं परिचक्षते कृष्णद्वैपायनप्रोक्तं नैमिषारण्यवासिषु ६ पूर्वं प्रचोदितः सूतः पिता लोमहर्षणः शिष्यो व्यासस्य मेधावी ब्राह्मणेष्विदमुक्तवान॥ ७ तस्मादहमुपश्रुत्य प्रवक्ष्यामि यथातथं इदमाख्यानमास्तीकं तुभ्यं शौनक पृच्छते ८ कथयिष्याम्यशेषेण सर्वपापप्रणाशनं आस्तीकस्य पिता ह्यासीत्प्रजापतिसमः प्रभुः ब्रह्मचारी यताहारस्तपस्युग्रे रतः सदा ९ जरत्कारुरिति ख्यात ऊर्ध्वरेता महातपाः यायावराणां प्रवरो धर्मज्ञः संशितव्रतः १० स कदाचिन्महाभागस्तपोबलसमन्वितः चचार पृथिवीं सर्वां यत्रसायंगृहो मुनिः [illegible] तीर्थेषु च समाप्लावं कुर्वन्नटति सर्वशः चरन्दीक्षां महातेजा दुश्चरामकृतात्मभिः १२ वायुभक्षो निराहारः शुष्यन्ननिमिषो मुनिः इतस्ततः परिचरन्दीप्तपावकसप्रभः १३ अटमानः कदाचित्स्वान्स ददर्श पितामहान् लंबमानान्महागर्ते पादैरूर्ध्वैरवाङ्मुखान् १४ तानब्रवीत्स दृष्ट्वैव जरत्कारुः पितामहान् के भवन्तोऽवलंबन्ते गर्ते ह्यस्मिन्नधोमुखाः १५ वीरणस्तंबके लग्नाः सर्वतः परिभक्षिते मूषकेण निगूढेन गर्तेऽस्मिन्नित्यवासिना १६ ॥ ॥ ॥

दिकं काले परिचरन्भुंजन् १३ यज्ञाणां संततेर्वंशस्य गतिं रूपकेणाह अटमान इति। अवाग्गर्तमस्लोके ऊर्ध्वपादत्वाधोमुखत्वाभ्यां स्वर्गस्थत्वेपि पातभयेन व्याकुलत्वमुक्तं १४ १५ वीरणं तृणं तस्तम्बो वंशस्तोमः मूषकः कालः १६ १६ ॥ ॥ ॥ ॥ ॥ ७

ज३

२२ २४ नदारानितिनियोगायधनंदारसंग्रहोनकार्यः किंतुपुत्रकृत्योर्वार्थइतिभावः २५ २६ सनाम्नीतिप्रायेणावलंबनोपपर्यार्थनामत्वात्ताजरत्कारुशब्देनतपसानीर्यमाणशरीरत्वंविवक्षितं। तादृशो

पितरऊचुः यायावरानामवयमृषयः संशितव्रताः संतानप्रक्षयाद्ब्रह्मन्नधोगच्छाममेदिनीं २७ अस्माकंसंततिस्त्वेकजरत्कारु[illegible]रितिस्मृतः मं
दभाग्योल्पभाग्यानांतपएकंसमास्थितः १८ नसपुत्रान्जनयितुंदारान्मूढश्चिकीर्षति तेनलंबामहेगर्तेसंतानप्रक्षयादिह १९ अनाथास्तेन
नाथेनयथादुष्कृतिनस्तथा कस्त्वंबंधुरिवास्माकमनुशोचसिचानघ २० ज्ञातुमिच्छामब्रह्मन्कोभवानिहनः स्थितः किमर्थंचैवनः शोच्यान
नुशोचसिसत्तम २१ जरत्कारुरुच ममपूर्वेभवंतोवैपितरः सपितामहाः ब्रूतकिंकरवाण्यद्यजरत्कारुरहंस्वयं २२ पितरऊचुः यतस्वयत्न
वांस्तातसंतानायकुलस्यनः आत्मनोर्थेस्मदर्थेचधर्मइत्येववाविभो २३ नहिधर्मफलैस्तातनतपोभिः सुसंचितैः तांगतिंप्राप्नुवंतीहपुत्रिणो
यांव्रजंतिहि २४ तद्दारग्रहणेयत्नंसंततौचमनःकुरु पुत्रकास्मन्नियोगात्त्वमेतन्नः परमंहितं २५ जरत्कारुरुच नदारान्वैकरिष्येहंदासं म
भावितंमनः भवतांतुहितार्थायकरिष्येदारसंग्रहं २६ समयेनचकर्ताहमनेनविधिपूर्वकं तथायद्युपलप्स्यामिकरिष्येनान्यथाह्यहं २६
सनाम्नीयाभवित्रीमेदित्सिताचैवबंधुभिः भैक्ष्यवत्तामहंकन्यामुपयंस्येविधानतः २७

५१

हंस्वसदृशीमेवभार्यांकरिष्यामि। दित्सितांदातुमिष्टांतैरेवाहंप्रार्थमानोगृहीष्यामिनत्वहंतामर्थयेयमिसर्यः भैक्ष्यवदित्यनेनधनार्जनपूर्वकंदारसंग्रहंनकरिष्यामितिदर्शितं २७ ॥ ७ ॥

३० निवेशायदारसंग्रहाय्याः पतिर्ब्रह्मचारी ३१ ३५ यतीन्द्रप्रतिग्रह्लोषा ३६ ३७ एवमास्तीकोसत्रिमुक्तः सर्पसत्रनिमित्तं सर्पाणां मातृशापमुपक्षिपति मात्राही सावित्राध ह्मा

इति श्रुत्वापत्निमेभार्यांकोदास्यतिविशेषतः प्रतिग्रहीष्येभिक्षांतयदिकश्चित्प्रदास्यति २८ एवंदारक्रियाहेतोर्यतिष्येहंपितामहाः अनेनविधिना शश्वत्करिष्येहमन्यथा २९ तत्रचोत्पत्स्यतेजंतुर्भवतांतारणायवै शाश्वतंस्थानमासाद्यमोदंतांपितरोमम ३० सूतउवाच ततोनिवेशायपतिः सविप्रः संशितव्रतः महींचचारदारार्थीनचदारानविंदत ३१ सकदाचिद्वनंगत्वाविप्रः पितृवचः स्मरन् चुक्रोशकन्यांभिक्षार्थीतिस्त्रोवाचः शनैरिव ॥ ३२ तंवासुकिः प्रत्यगृह्णादुद्यम्यभगिनींतदा नसतांप्रतिजग्राहनसनाम्नीतिचिंतयन् ३३ सनाम्नींचोद्यतांभार्यांगृह्णीयामितितस्यहि मनोनिविष्टमभवज्जरत्कारोर्महात्मनः ३४ तमुवाचमहाप्राज्ञोजरत्कारुर्महातपाः किंनाम्नीभगिनीयंतेब्रूहिसत्यंभुजंगम ३५ वासुकिरुवाच जरत्कारोजरत्कारुःस्वसेयमनुजाममत्वदर्थंरक्षितापूर्वंप्रतीच्छेमांद्विजोत्तम ३६ एवमुक्त्वाततः प्रादाद्भार्यार्थेवरवर्णिनीं सचतांप्रतिजग्राहविधिदृष्टेनकर्मणा ३७ सौतिरुवाच मात्राहिभुजगाः शप्ताः पूर्वंब्रह्मविदांवर जनमेजयस्ययोयज्ञेधक्ष्यत्यनिलसारथिः ३८ तस्यशापस्यशांत्यर्थंप्रददौपन्नगोत्तमः स्वसारमृषयेतस्मैसुव्रतायतपस्विने ३९ सचतांप्रतिजग्राहविधिदृष्टेनकर्मणा आस्तीकोनामपुत्रश्चतस्यांजज्ञेमहात्मनः ४० तपस्वीचमहात्माचवेदवेदांगपारगः समः सर्वस्यलोकस्यपितृमातृभयापहः ४१

तिभस्मीकरिष्यतिः अनिलसारथिर्वह्निः ३८ ३९ जज्ञेजातः ४० पितृमातृपदेनतत्संबंधिनोयायावरास्तेतेषांभयापहः ४१ ॥ ॥ ॥ ॥ ॥ ॥ ॥

प्र१

आजहारचक्रे ४२ ४३ भ्रातॄन्मातुलपुत्रान ४४ ४७ प्रब्रूहिपृच्छ ४८ [illegible]योदशः सौतेइतिशुश्रूषापरोऽतमिच्छा १ पितेवलोमहर्षणाद्वरश्चस्मच्छुश्रूषणेः स्मानिवपितेः।

सु४

अथदीर्घस्यकालस्यपांडवेयोनराधिपः आजहारमहायज्ञंसर्पसत्रमितिश्रुतिः ४२ तस्मिन्प्रवृत्तेसत्रेतुसर्पाणामंतकायवै मोचयामासतांस्तानास्ती
तीकः समहायशाः ४३ भ्रातॄंश्चमातुलांश्चैवतथैवान्यान्सपन्नगान पितॄंश्चतारयामाससंतत्यातपसातथा ४४ व्रतैश्चविविधैर्ब्रह्मन्स्वाध्या
यैश्चानृणोभवत देवांश्चतर्पयामासयज्ञैर्विविधदक्षिणैः ऋषींश्चब्रह्मचर्येणसंतत्याचपितामहान ४५ अपहृत्यगुरुंभारंपितॄणांसंशितव्रताः
जरत्कारुर्गतः स्वर्गंसहितःस्वैः पितामहैः ४६ आस्तीकंचसुतंप्राप्यधर्मंचानुत्तमंमुनिः जरत्कारुः सुमहताकालेनस्वर्गमीयिवान ॥ ४७
एतदास्तीकमाख्यानंयथावत्कथितंमया प्रब्रूहिभृगुशार्दूलभूयः किंकथ्यतामिति ४८ इत्यादिपर्वण्यास्तीके शौनकउ च सौतेत्वं
कथयस्वेमांविस्तरेणकथांपुनः आस्तीकस्यकवेः साधोः शुश्रूषापरमाहिनः १ मधुरंकथ्यतेसौम्यश्लक्ष्णाक्षरपदंत्वया प्रीयामहेभृ
शंतातपितेवेदंप्रभाषसे २ अस्मच्छुश्रूषणेनित्यंपिताहिनिरतस्तव आचष्टैतद्यथाख्यानंपितातेत्वंतथावद ३ सूतउ च आयुष्मन्निदमा
ख्यानमास्तीकंकथयामिते यथाश्रुतंकथयतः सकाशाद्वैपितुर्मम ४ [illegible]
[illegible] ...द्वैपितुर्मम ४ पुरादेवयुगेब्रह्मन्प्रजापतिसुतेशुभे आस्तांभगिन्यौरूपेणसमु
पेतेऽद्भुतेऽनघ ५ ॥

प्र४

आचष्टउक्तवान ३४ रूपेणसौंदर्येण। रूपंस्वभावेसौंदर्येइतिमेदिनी अद्भुतेइत्यादेः पूर्वहृदयमार्थं ॥ ॥ छ ॥ ॥ छ ॥ छ ॥ ॥छ ॥ छ ॥

६ वरातिसर्गं वरदानं ७ ८ ओजसा इंद्रियबलेन। तेजसा शरीरबलेन। दीप्त्या कांत्या विक्रमेण पराभिभवसामर्थ्येन ९ ५१ १२ दशकृत्वआवृत्ताः नवपथानवतिः एवंदशतिः षष्टिसप्तति
वत्दशतीर्दशेति सहस्रमित्यर्थः १३ उपस्वेदोऽग्निकऊष्मा तद्युक्तेषु सोपस्वेदेषु। तन्नत्वंडांतर्जलंशीघ्रंघनीभवतीति १४ पंचशते पंचशताः वर्षाणांकालेसंवत्सरे। मिथुनंनिःसृतंन ८२

तेभार्येकश्यपस्यास्तांकद्रूश्चविनताचह प्रादात्ताभ्यांवरंप्रीतःप्रजापतिसमःपतिः कश्यपोधर्मपत्नीभ्यांमुदापरमयायुतः ६ वरातिसर्गंश्रुत्वैवं
वकश्यपादुत्तमंचते हर्षादप्रतिमांप्रीतिंप्रापतुःस्मवरस्त्रियौ ७ वव्रेकद्रूः सुतान्नागान्सहस्रंतुल्यवर्चसः द्वौपुत्रौविनतावव्रेकद्रूपुत्राधिकौ
बले ८ ओजसातेजसादीप्त्याविक्रमेणाधिकौचतौ तस्यैभर्त्तावरंप्रादादध्यर्थंपुत्रमीप्सितम् एवमस्त्वितितंचाहकश्यपंविनतातदा यथावत्प्रा
र्थितंलब्ध्वावरंतुष्टाभवत्तदा १० कृतकृत्यातुविनतालब्ध्वावीर्याधिकौसुतौ कद्रूश्चलब्ध्वापुत्राणांसहस्रंतुल्यवर्चसां १२ धार्यौप्रयत्नतोगर्भा
वित्युक्त्वासमहातपाः तेभार्येवरसंहृष्टेकश्यपोवनमाविशत् १३ सुतउ च कालेनमहताकद्रूरंडानांदशतीर्दश जनयामासविप्रेंद्रद्वेचांडेवि
नतातस्या तयोरंडानिनिदधुःप्रहृष्टाःपरिचारिकाः सोपस्वेदेषुभांडेषुपंचवर्षशतान्युत १४ ततः पंचशतेकालेकद्रूपुत्राविनिःसृताः अ
ण्डाभ्यांविनतायास्तुमिथुनंनव्यदृश्यत १५ ततःपुत्रार्थिनीदेवीव्रीडिताचतपस्विनी अंडंबिभेदविनतातत्रपुत्रंददर्शह १६ पूर्वार्द्धकाय
संपन्नमितरेणाप्रकाशता सपुत्रोरोषसंपन्नःशशापैनामितिश्रुतिः १७

नव्यदृश्यत न दृष्टं १५ व्रीडिता सपत्न्याः पुत्रसंपत्त्यालज्जिताः १६ ॥ श्रीरामायनमः॥ ॥ श्रीरामनामतारकं ॥ रामराम ॥ ॥ ॥ ॥
पूर्वार्द्धकायोमूलाधारादुपरितनभागः तेनसंपन्नं अध्यर्द्धेतिपाठे अर्धनाभ्यवधि नतो अधिकोऽध्यर्द्ध इत्यर्थः इतरेण अध्यर्द्धादधस्तेन अप्रकाशता अनिष्पन्नत्वात् १७

२१९ अनंगंमामिवो र्धंगंम्रद्दरावयवं २० प्रतिपालयितव्यः परीक्षुणीयः २१ २२ २३ विधात्राविहितामिमिपोजना २४ चतुर्दशः एतस्मिन् समायाते एकीभूते २४ ज्वलंतंदीप्यमा

घ ३

योहमेवंकृतोमातस्त्वयालोभपरीतया शरीरेणासमग्रेणातस्माद्दासीभविष्यसि १८ पंचवर्षशतान्यस्यायस्याविस्पर्द्धसेमया एषचत्वांमतोमातर्दासीत्वा
न्मोक्षयिष्यति १९ यद्येनमपिमातस्त्वंमामिवांडविभेदनात् नकरिष्यस्यनंगंवाव्यंगंवापितपस्विनं २० प्रतिपालयितव्यस्तेजन्मकालोस्यधीरया
विशिष्टंबलमीप्संत्यापंचवर्षशतात्परः २१ एवंशप्त्वाततः पुत्रोविनतामंतरिक्षगः अरुणोदृश्यतेब्रह्मन्प्रभातसमयेसदा २२ आदित्यरथम ध्या
स्तेसारथ्यंसमकल्पयत् गरुडोपियथाकालंजज्ञेपन्नगभोजनः २३ सजातमात्रोविनतांपरित्यज्यखमाविशत् आदास्यन्नात्मनोभोज्यमन्नं
विहितमस्यपत् विधात्राभृगुशार्दूलक्षुधितः पतगेश्वरः २४ आदिपर्वणिपालीके सूतउ च एतस्मिन्नेवकालेतभगिन्यौते तपोधन अ
पश्यतांसमायातउच्चैः श्रवसमंतिके १ यंतंदेवगणाः सर्वेहृष्टरूपम पूजयन् मथ्यमानेऽमृतेजातमश्वरत्नमनुत्तमं २१ अमोघबलमश्वा
नामुत्तमंजयतांवरं श्रीमंतमजरंदिव्यंसर्वलक्षणपूजितं ३ शौनकउ च कथंतदमृतंदेवैर्मथितंक्वचशंसमे यत्रजज्ञेमहावीर्यः सोश्व
राजोमहाद्युतिः ४ सौतिरुवाच ज्वलंतमचलंमेरुंतेजोराशिमनुत्तमं आक्षिपंतंप्रभां भा नोः स्वशृंगैः कांचनोज्वलैः ५ ॥ ॥

र्नेमसमागम्यदिवौकसः अमृतायमंत्रयितुमारब्धाइतियच्छेनान्वयः किंकृत्वातमेरोःशृंगंअध्यास्येतिसंबंधः ५ ॥ ॥ ॥ ॥ ॥ ७

श्री अप्रमेयं अतिमनोहरत्वात् मनसा वाचा कल्पयितुमशक्यं ६ आवारितं आचीर्णं ७ अगम्यं अप्राप्यं। अन्यैः प्राकृतैः ८ अनंतो विस्तार आकाशो वा तत्र ईषन्न्यूनं बहुत्वं यस्य अनंतकल्पम् उद्विद्धं
उच्चं ९ ११ कलश इव कलशो मथनाधारत्वात् स चासावुदधिः समुद्रः कलशोदधिः क्षीरसमुद्र इति केचित् कलशाः पाषाणमयाः पर्वताः मैनाकादयः शेरते ऽस्मिन्निति कलशः समुद्रः स च

कांचनाभरणं चित्रं देवगंधर्वसेवितं अप्रमेयमनाधृष्यमधर्मबहुलैर्जनैः ६ व्यालैरावारितं घोरैर्दिव्यौषधिविदीपितं नाकमावृत्य तिष्ठंतमुच्छ्रयेण महागिरिं ७ अगम्यं मनसाप्यन्यैर्नदीवृक्षसमन्वितं नानापतगसंघैश्च नादितं सुमनोहरैः ८ तस्य शृंगमुपारुह्य बहुरत्नाचितं शुभं अनंतकल्पमुद्विद्धं सुराः सर्वे महौजसः ९ ते मंत्रयितुमारब्धास्तत्रासीना दिवौकसः अमृताय समागम्य तपोनियमसंयुताः १० तत्र नारायणो देवो ब्रह्माणमिदमब्रवीत् चिंतयत्सु सुरेष्वेवं मंत्रयत्सु च सर्वशः ११ देवैरसुरसंघैश्च मथ्यतां कलशोदधिः भविष्यत्यमृतं तत्र मथ्यमाने महोदधौ १२ सर्वौषधीः समावाप्य सर्वरत्नानि चैव हि मंथध्वमुदधिं देवा वेत्स्यध्वममृतं ततः १३ इत्यादिपर्वण्यमृतमथने १५ सूत उ च ततोऽभ्रशिखराकारैर्गिरिशृंगैरलंकृतं मंदरं पर्वतवरं लताजालसमाकुलं १ नानाविहगसंघुष्टं नानादंष्ट्रिसमाकुलं किंनरैरप्सरोभिश्च देवैरपि च सेवितं २
एकादश सहस्राणि योजनानां समुच्छ्रितं अधो भूमेः सहस्रेषु तावत्स्वेव प्रतिष्ठितं ३

दधिः उदकानि धीयंते ऽस्मिन्निति योगात् जलसमुद्रस्सर्वः विशेषणं विशेष्येण बहुलमिति समासः कलशो हि हृदयदि स्तोत्रेषु क्षोभ्यतां कलशः सर्वैरिति वाक्यशेषात् आर्यत्वात् प्रसिद्धभावे हेतुः प्रसिद्धापि अर्थनिर्णयस्याप्युपगमात् १२ वेत्स्यध्वं लप्स्यध्वं १३ अध्यायः पंचदशः ततोऽभ्र १३

६ अनंतः शेषः ७ पर्वतराजानं अनिस[..]त्वात् समासांतः अच्। सवनं सह वनैः सवनं स्वनेनेति। अमृतप्रसवसाधनं ८ तेन पर्वतेनामृताः ९ तेन मंदरमथनं समुद्रमथनः जलं तवेति शेषः १० अकूपारे [..] समुद्रे
समीपे। कूर्मो पार्थनपाठेषु विसर्गसंध्याहारः अधिष्ठानं गिरेर्वा तुलं निगमिषतो मंदरस्याधारः ११ १२ मंथानं मथनदंडं नेत्रं मंथनरज्जुं १३ एकमंतं मुखप्रदेशं उपाश्लिष्टाः इदं छन्न

तमुद्धर्तुमशक्ता वै सर्वे देवगणास्तदा विष्णुमासीनमभ्येत्य ब्रह्माणं चेदमब्रुवन् ४ भवंतावत्र कुर्वीतां बुद्धिं नैःश्रेयसीं परां मंदरोद्धरणे यत्नः क्रियतां च हिताय नः ५ सूत उ० तथेति चाब्रवीद्विष्णुर्ब्रह्मणा सह भार्गव अचोदयदमेयात्मा फणींद्रं पद्मलोचनः ६ ततोऽनंतः समुत्थाय ब्रह्मणा परिचोदितः नारायणेन चाप्युक्तस्तस्मिन्कर्मणि वीर्यवान् ७ अथ पर्वतराजानं तमनंतो महाबलः उज्जहार बलाद्ब्रह्मन्सवनं सवनौकसं ८ ततस्तेन सुराः सार्द्धं समुद्रमुपतस्थिरे तमूचुरमृतस्यार्थे निर्मथिष्यामहे जलं ९ अपां पतिरथोवाच ममाप्यंशो भवेत्ततः सोढास्मि विपुलं मर्दं मंदरभ्रमणादिति १० ऊचुश्च कूर्मराजानमकूपारे सुरासुराः अधिष्ठानं गिरेरस्य भवान्भवितुमर्हति ११ कूर्मेण तु तथेत्युक्त्वा पृष्ठमस्य समर्पितं तं शैलं तस्य पृष्ठस्थं यंत्रेणेंद्रो ह्यपीडयत् १२ मंथानं मंदरं कृत्वा तथा नेत्रं तु वासुकिं देवा मथितुमारब्धाः समुद्रं निधिमंभसां १३ अमृतार्थिनो ब्रह्मंस्तथैवासुरदानवाः एकमंतमुपाश्लिष्टा नागराज्ञो महात्मनः १४ विबुधाः सहिताः सर्वे यतः पुच्छं ततः स्थिताः अनंतो भगवान्देवो यतो नारायणस्ततः शिर उद्यम्य नागस्य पुनः पुनरवाक्षिपत् १५ ॥ ॥ ॥ ॥ ॥

वंतः १४ अनंतः शेषो विष्णुपक्षीयाः वासुकेः शिर उद्यम्य समाक्षिपनत् न्यावाल्लिः स्वतं विषं स्वपं मेघवानिति भावः ५ ॥ ॥ ॥ ॥ ॥

वासुकिमुखोल्लिखितंवायादिदेवोपकारणायाभूदित्याह वासुकेरितिद्वाभ्यां। आक्षिप्यतः आक्षिप्यमाणस्यरनेनमेघसधूम्रज्योतिर्वतिं [illegible] वाभिनिषतस्मुखे १६ १७ जलवाममस्पदयः अस्मदादिव

नश्रम

वासुकेरथनागस्यसहसाक्षिप्यतः सुरैः सधूमाः सार्चिषोवातानिष्पेतुरसकृन्मुखात् १६ तेधूमसंघाः संभूतामेघसंघाः सविद्युतः अभ्यवर्षन्सु
रगणाञ्छ्रमसंतापकर्षितान् १७ तस्माच्चगिरिकूटाग्रात्प्रच्युताः पुष्पवृष्टयः सुरासुरगणान्सर्वान्समंतात्समवाकिरन् १८ बभूवात्रमहाना
दोमहामेघरवोपमः उदधेर्मथ्यमानस्यमंदरेणसुरासुरैः १९ ततोनानाजलचराविनिष्पिष्टामहाद्रिणा विलयंसमुपाजग्मुःशतशोल
वणांभसि २० वारुणानिचभूतानिविविधानिमहीधरः पातालतलवासीनिविलयंसमुपानयत् २१ तस्मिंश्चभ्राम्यमाणेद्रौसंघृष्यंतः
म परस्परं न्यपतंगोपेतांग्रान्महाद्रुमाः २२ तेषांसंघर्षजश्चाग्निरर्चिभिः प्रज्वलन्मुहुः विद्युद्भिरिवनीलाभ्रमावृणोन्मंदरंगिरिं २३ ददाह
कुंजरांस्तत्रसिंहांश्चैवविनिर्गतान् विगतासूनिसर्वाणिसत्वानिविविधानिच २४ तमग्निममरश्रेष्ठः प्रदहंतमितस्ततः वारिणामेघजेनें
द्रः शमयामाससर्वतः २५ ततोनानाविधास्तत्रसुस्रुवुः सागरांभसि महाद्रुमाणांनिर्यासाबहवश्चौषधीरसाः २६ ॥ ॥ॐ

पर्वता ३ त२

सार्थिवांशवधावदेहाः २० वारुणानिवरुणलोकस्थानिआप्यांशप्रधानदेहानि २१ पर्वताग्रात्पतमानानांद्रुमाणांसंघर्षाज्जातोग्निः पर्वतंव्याप्नुवन्तत्रस्थसिंहादीन्ददाहेत्याह त्रिभिः तस्मिन्निति २२

तेषांद्रुमौषधीनांपेः स्रुतवीर्योरसास्तेनपयसाक्षीरेणकांचनस्यस्वर्णमयस्यपर्वतस्यनिस्रवातदिव्यप्रभावानेकमणिभ्योनिःस्रतात्तल्लाक्षसराश्चमृततत्वंजग्मुः २७ ततःपयोभिःस्वंवंश्य पयसमुद्रस्यतस्यारंभदकंजलवर्णमभसीसायकमात्पयः क्षीरंजातंपयाक्षारमक्षारंचजलंगवित्तरणादिसंपाप्यक्षीरंभवतितद्दिसर्थः पयोपिरसोन्तमेर्विमिश्रमभितततोहेतोः क्षीरादभूद्दृतं २८

तेषाममृतवीर्याणांरसानांपयसैवच अमरत्वंसुराजग्मुः कांचनस्यचविस्रवात ततस्तस्यसमुद्रस्यतज्जातमुदकंपयः रसोत्तमविमिश्रंचततः क्षीरादभूद्दृतं २८ ततोब्रह्माणमासीनंदेवावरदमब्रुवन श्रांताःस्मसमशंब्रह्मन्नोद्भवत्यमृतंचतत २९ ऋतेनारायणंदेवंसर्वेपेदेवदानवाः चिरारब्धमिदंचापिसागरस्यापिमथनं ३० ततोनारायणंदेवंब्रह्मावचनमब्रवीत विधत्स्वैषांबलंविष्णोभवानत्रपरायणं ३१ विष्णुरुवाच बलंददामिसर्वेषांकर्मैतद्येसमास्थिताः क्षोभ्यतांकलशःसर्वैर्मंदरःपरिवर्त्यतां ३२ सूतउवाच नारायणवचःश्रुत्वाबलिनस्तेमहोदधेः तत्पयःसहिताभूयश्चक्रिरेभृशमाकुलं ३३ ततःशतसहस्रांशुर्मथ्यमानात्तुसागरात प्रसन्नात्मासमुत्पन्नःसोमःशीतांशुरुज्वलः ३४ श्रीरनंतरमुत्पन्नाघृतात्पांडुरवासिनी सुरादेवीसमुत्पन्नातुरगःपांडुरस्तथा ३५ कौस्तुभस्तुमणिर्दिव्यउत्पन्नोघृतसंभवः मरीचिविकचःश्रीमान्नारायणउरोगतः ३६ श्रीःसुराचैवसोमश्चतुरगश्चमनोजवः यतोदेवास्ततोजग्मुरादित्यपथमाश्रिताः ३७ धन्वंतरिस्ततोदेवोवपुष्मानुदतिष्ठत श्वेतंकमंडलुंबिभ्रदमृतंयत्रतिष्ठति ३८ ॥

३१ शतसहस्रंलक्षंअंशवोयस्यसःशतसहस्रांशुः आप्यायनीयोषधिभेदात्तस्मयोयस्सशत। सहस्रांशुःशतसहस्रांनरतिपारेअंतरोशद्योगमप्रदेशपरः ३४ घृतेनद्यावापृथिवीऊंधीतिपार्जनेदशना ल्लैघृतंउकप्रसिद्धेश्चघृतंजलंतस्मात्श्रीस्समुत्पन्ना। इमौषधिरसाज्जलस्यक्षीरत्वंततोघृतमितिसारत्वमात्रंविवक्षितं ३५ मरीचिविकचोरश्मिभिःस्फुरन्नारायणउरोगतःहृदयसंधिस्थितः

३९ ऐरावणः ऐरावतः नागो हस्ती ४० ४२ निराशाः विषमध्ये तैर्गृहीतं अस्माभिस्तत्तद् ग्रहणासमर्थैः कथममृतं लप्स्यते इति भावः महान् ग्रहः संग्रहो येन तत् महाग्रहं तत् ४४ अभिसंश्रितः सं

एतदत्यद्भुतं दृष्ट्वा दानवानां समुत्थितः अमृतार्थे महान् नादो ममेदमिति जल्पतां ३९ अश्वैस्तैरश्वतरैर्मुक्तं महाकायस्ततः परं ऐरावणो महानागोऽ भवद्वज्रभृता धृतः ४० अतिनिर्मथनादेव समजायत ततः परं जगदावृत्य सहसा सधूमोऽग्निरिवज्वलन् ४१ त्रैलोक्यं मोहितं यस्य गन्धमाघ्राय तद्विषं पायसमल्लोकरक्षार्थं ब्रह्मणो वचनाच्छिवः ४२ दधार भगवान् कण्ठे मन्त्रमूर्तिर्महेश्वरः तदा प्रभृति देवस्तु नीलकण्ठ इति श्रुतिः ४३ एतदद्भुतं दृष्ट्वा निराशा दानवाः स्थिताः अमृतार्थे च लक्ष्म्यर्थे महान्तं वैरमास्थिताः ४४ ततो नारायणो मायां मोहिनीं समुपाश्रितः स्त्रीरूपमद्भुतं कृत्वा दानवानभिसंश्रितः ४५ ततस्तदमृतं तस्यै ददुस्ते मूढचेतसः स्त्रियै दानवदैतेयाः सर्वे तद्गतमानसाः ४६ इत्यादिपर्वणि अमृतमथने सूतउवाच अथावराणि मुख्यानि नानाप्रहरणानि च प्रगृह्याभ्यद्रवन्देवान्सहिता दैत्यदानवाः १ ततस्तदमृतं देवो विष्णुरादाय वीर्यवान् जहार दानवेन्द्रेभ्यो नरेण सहितो विभुः २ ततो देवगणाः सर्वे पपुस्तदमृतं तदा विष्णोः सकाशात्संप्राप्य संभ्रमे तत्र संकुले सति ३ ततः पिवत्सु तत्कालं देवेष्वमृतमीप्सितं राहुर्विबुधरूपेण दानवः प्रापिवत्तदा ४ ॥ ॥ ॥ ॥ ॥

भवः मोहनार्थमिसर्थः ४५ अमृतादपि विस्रंशः संगमाद्येणापोषितां दधतां मोहनीं रूपं हरिणो वंशप्रकाशितं ४६ अध्यायः षोडशः आवराणि मुख्यानि कवचानि प्रहरणानि खड्गादीनि १ २ संभ्रमे उभये षामममृताद्रोसति ३ ४ ॥ ॥

११ प्रासाः स्वल्पकुन्ताः क्षुद्रभल्लाः विंध्येकरकारी इति प्रसिद्धाः तोमराः दीर्घदंडाः स्थूलदण्डाः कुन्ताः लोके बिरछा इति प्रसिद्धाः विविधानि शस्त्राणि यमदंष्ट्रादीनि लोकप्रसिद्धानि जमधरादीनि १२ ऋष्टिः खड्गः

तस्य कंठमनुप्राप्ते दानवस्यामृते तदा आख्यातं चन्द्रसूर्याभ्यां सुराणां हितकाम्यया ५ ततो भगवता तस्य शिरश्छिन्नमलंकृतं चक्रायुधेन चक्रेण पि
बतोऽमृतमोजसा ६ तच्छैलशृंगप्रतिमं दानवस्य शिरो महत् चक्रच्छिन्नं खमुत्पपात नादातिभयंकरं ७ तत्कवंधं पपातास्य विस्फुरद्धरणीतले स
पर्वतवनद्वीपां दैत्यस्याकंपयन्महीं ८ ततो वैरविनिर्बंधः कृतो राहुमुखेन वै शाश्वतश्चन्द्रसूर्याभ्यां ग्रसत्यद्यापि चैव तौ ९ विहाय भगवांश्चापि स्त्री
रूपमतुलं हरिः नानाप्रहरणैर्भीमैर्दानवान्समकंपयत् १० ततः प्रवृत्तः संग्रामः समीपे लवणांभसः सुराणामसुराणां च सर्वघोरतरो महा
न् ११ प्रासाश्च विपुलास्तीक्ष्णान्यपतंत सहस्रशः तोमराश्च सुतीक्ष्णाग्राः शस्त्राणि विविधानि च १२ ततोऽसुराश्चक्रभिन्ना वमंतो रुधिरं बहु
असिशक्तिगदारुग्णा निपेतुर्धरणीतले १३ छिन्नानि पट्टिशैश्चैव शिरांसि युधि दारुणैः तप्तकांचनचित्राणि निपेतुरनिशं तदा १४ रुधिरेणाव
लिप्तांगा निहताश्च महासुराः अद्रीणामिव कूटानि धातुरक्तानि शेरते १५ हाहाकारः समभवत्तत्र तत्र सहस्रशः अन्योन्यं छिंदतां शस्त्रैरादित्ये लो
हितायति १६ परिघैरायसैस्तीक्ष्णैः संनिकर्षे च मुष्टिभिः निघ्नतां समरेऽन्योन्यं शब्दो दिवमिवास्पृशत् १७ ॥ ॥ ॥

: शक्तिः हस्तक्षेप्यो लोहदंडः पृथुबुध्नः गदा मुसलः स एव १३ पट्टिशः खड्गविशेषः उभयतो धारः तीक्ष्णाग्रः पटा इति प्रसिद्धः १४ १६ परिघः परितो [illegible] हन्ति इति तथा सर्वतः कंटकितो लोहदंडः ए
वमग्रेपि लोकप्रसिद्ध्यनुसारेण योगबलेन च आयुधवाचिना शब्देनामार्थो बोध्यः ॥ १७ ॥ ॥ ॥ ॥ ॥

२३ प्रेरितेप्रेरितो। अत्रोपसर्गस्त्विभाग्निमेनेन्त्र कालोयः २४ विगलिताः रिक्ताः मेघाः तत्कालसंक्षयः श्वेतभास्वरसर्वः २५ बहुविधानीलपीतादिधातुमन्नात। मेघरूपित्वं गगनगामित्वा

मात्र २

छिद्धिभिर्भिं विश्ववावलंपातयामिसोतिच यश्रूयंतमहाघोरः शब्दास्तत्रसमंततः एवंसतमलेपुद्देवर्त्तमानेमहाभये नारनारायणौदेवौसमाजग्मतुरद्र
वे १९ तत्रदिव्यंधनुर्दृष्ट्वानरस्यभगवानपि चिंतयामासतच्चक्रंविष्णुर्दानवसूदनं २० ततोवाच्छितितैमागतंमहाप्रभंचक्रममित्रतापनं विभाव
सोहसम्मकुंडमंडलंसुदर्शनंसंयतिभीमदर्शनं २१ तदागतंज्वलितहुताशनप्रभंभयंकरंकरिकरबाहुरच्युतः मुमोचवैबलवदुदग्रवेगवान्महाप्रभं
परनगरावदारणं २२ तद्धंतकज्वलनसमानवर्चसंपुनः पुनर्न्यपततवेगवत्तदा विदारयद्दितिदनुजान्सहस्रशः करेरितंपुरुषवरेणसंयुगे २३ दहत्क
चिज्ज्वलनइवावलेलिहत्प्रसह्यतानसुरगणान्न्यकृंतत प्रवेरितंवियतिमुहुःक्षितौतथापपौरणेरुधिरमथोपिशाचवत २४ तथाऽसुरागिरिभिरदी
नचेतसोमुहुर्मुहुः सुरगणमर्दयंस्तदा महाबलाविगलितमेघवर्चसः सहस्रशोगगनमभिप्रपद्यह २५ अथांवराद्भयजननाः प्रपेदिरेस
पादपावहुविधमेघरूपिणः महाद्रयः परिगलिताग्रसानवः परस्परंद्रुतमभिहत्यसस्वनाः २६ ततोमहीप्रविचलितासकाननामहाद्रिपाताभि
हतासमंततः परस्परंभृशमभिगर्जतांमुहुस्ताजिरंभृशमभिसंप्रवर्त्तिते २७ नरस्ततोवरकनकाग्रभूषणैर्महेषुभिर्गगनपथंसमावृणोत वि
दारयन्गिरिशिखराणिपत्रिभिर्महाभयेऽसुरगणानिग्रहेतदा २८ ॥ ॥ ॥ ॥ ॥ ॥ ॥

न २६ २७ असुरगणाः रुद्रागवोपलक्षिताः देवास्तेषांवियद्गणाः प्रमथसंख्योघेश्वतिमेदिनी २८ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

श्री०
७५

निशम्यविज्ञापतेऽमृताः २९ सलिलधराः अमृतममृतोदेवाः ३० किरीटिनेनराय ३१ तत्पायामेप्पविबुधानाधिर्जितविमग्नवाहोः देवाश्चवशगाविष्णोः प्रारेतदिहेरितं १ अध्यायोमतमं

ततोमहीलवणजलंचसागरंमहासुराःप्रविविशुर्दिताःसौरैःविपन्नंतज्ज्वलितहुताशनप्रभंसदर्शनंपरिकुपितंनिशम्यते २९ ततःसौर्विज
यमवाप्यमंदरःस्वमेवदेशंगमितःसुपूजितःविनाघयंदिवमपिचैवसर्वशस्ततोगतासलिलधरायथागतं ३० ततोमृतंसुनिहितमेवचक्रि
रेसुराःपरांमुदमधिगम्यपुष्कलांददौचतंनिधिममृतस्यरक्षितुंकिरीटिनेबलभिदथामरैःसह ३१ इत्यादिपर्वणिअमृतमथनंसमाप्तं १७
सौतिरुवाच एतत्तेकथितंसर्वममृतंमथितंयथा यत्रसोश्वःसमुत्पन्नःश्रीमानतुलविक्रमः १ यंनिशम्यतदाकद्रूर्विनतामिदमब्र
वीत् उच्चैःश्रवाहिंकिंवर्णोभद्रेप्रब्रूहिमाचिरं २ विनतोवाच श्वेतएवाश्वराजोयंकिंवामन्यसेशुभे ब्रूहिवर्णंत्वमप्यस्यततोत्रविपणा
वहे ३ कद्रूरुवाच कृष्णवालमहंमन्येहयमेनंशुचिस्मिते एहिसार्धंमयादीव्यदासीभावायभामिनि ४ सौतिरुवाच एवंतेसमयंकृत्वादासी
भावायवैमिथःजग्मतुःस्वगृहानेवश्वोद्रक्ष्यावइतिस्म ह ५ ततःपुत्रसहस्रंतुकद्रूर्जिह्मंचिकीर्षती आज्ञापयामासतदावालाभू
त्वांजनप्रभाः ६ आविशध्वंहयंक्षिप्रंदासीनस्यामहंयथा नान्वपद्यंतयेवाक्यंतान्शशापभुजंगमान् ७ ॥ ॥ ॥ ॥

यनार्थप्रकाशः एतत्ते २ पणावहेविपणांकुर्वहे ३ दीव्यविजिगीषस्व दासीभावाय मांवादासीकर्तुंत्वंवादासीभवितुंब्रूहिसर्थः ४ ५ जिह्मंकौटिल्यं ६ नान्वपद्यंतनानुमोदितवंतः ७ राम०
७५

१३ दंदशूकाः महादंशनशीलाः महाभोगाः महाशरीराः १४ १५ विषहरींविषघ्नींविषहरामितिवाथवा १६ अध्यायः १८ ततः उषायांव्युष्टायां १ दास्येविषये २

भा ३

सर्पसत्रेवर्त्तमानेपावकोवः प्रधक्ष्यति जनमेजयस्यराजर्षेः पांडवेयस्यधीमतः ८ शापमेनंतंशुश्रावस्वयमेवपितामहः अतिक्रूरंसमुत्सृष्टंकद्र्वा

ग्र२ दैवादतीवहि ९ सार्द्धंदेवगणैः सार्द्धंवाचंतामन्वमोदत बहुत्वंप्रेक्ष्यसर्पाणांप्रजानांहितकाम्यया १० तिग्मवीर्यविषाह्येतेदंदशूकामहा बलाः

तेषांतीक्ष्णविषत्वाद्धिप्रजानांचहिताय पक्षमौक्षकृतंतेषांपरपीडनसर्पिणां ११ अन्येषामपिसत्वानांनित्यंदोषपरास्तुये तेषांप्राणांतिकोदंडो

दैवेनविनिपात्यते १२ एवंसंभाष्यदेवस्तुपूज्यकद्रूवर्वतांतदा आहूयकश्यपंदेवइदंवचनमब्रवीत १३ यदेतेदंदशूकाश्चसर्पाजाता

स्त्वयाऽनघ विषोल्बणामहाभागामात्राशप्ताःपरंतप १४ तत्रमन्युस्त्वयातातनकर्त्तव्यःकथंचन दृष्टंपुरातनंह्येतत्यज्ञेसर्पविनाश

नं १५ इत्युक्त्वासृष्टिकृद्देवस्तंप्रसाद्यप्रजापतिं प्रादाद्विषहरींविद्यांकश्यपायमहात्मने १६ इत्यादिपर्वणिआस्तीकपर्वणिसौतिरुवाच ततो

रजन्यांव्युष्टायांप्रभातेभ्युदितेरवौ कद्रूश्चविनताचैवभगिन्यौतेतपोधन १ अमर्षितेसुसंरब्धेदास्येकृतपणेतदा जग्मतुस्तुरगंद्रष्टुमुच्चै

ःश्रवसमंतिकात २ ददृशातेथतेतत्रसमुद्रंनिधिमंभसां महांतमुदकागाधंक्षोभ्यमाणंमहास्वनं ३ तिमिंगिलझषाकीर्णंमकरैरावृतंतत

था सत्वैश्चबहुसाहस्रैर्नानारूपैःसमावृतं ४

उदकेनअगाधंतलस्पर्शशून्यं क्षोभ्यमाणंतिमिंगिलादिभिः ३४ " " " " " " " "

५१

रा०
७६

वेलायामांदोलमास्फालनं तज्जेन अनिलेन चलं ८ ९ गां पृथिवीं विंदता लभमानेन हेतौ शतृप्रत्ययः तेन हेतुना विक्षोभितेन जलेन आविलं आसं २० अविशीर्णतलान्वेषिणेति शेषः गाधं तलं पातालस्यापि तलं येनेत्यर्थः अव्ययं पातालादिस्थपेष्वविनाशं २१ सेवतः सेवमानस्य युगादिकालशयनं युगं कृतयुगं तस्याआदिभूतः प्रलयकालः तस्मिन् शयनं त[illegible]ल्पभूतं १२ हिंवा

भीषणैर्विकृतैरन्यैर्घोरैर्जलचरैस्ततः उग्रैर्निःस्वनमनाधृष्यं कूर्मग्राहसमाकुलं ५ आकरं सर्वरत्नानामालयं वरुणस्य च नागानामालयं रम्यमुत्तमं सरितां पतिं ६ अचिन्त्यमप्रमेयं च सत्त्वपूर्णजलं महत् घोरं जलचरारावैर्रौद्रं भैरवनिःस्वनं ७ गंभीरावर्तकलिलं सर्वभूतभयंकरं वेलादोलानिलचलं क्षोभोद्वेगसमुच्छ्रितं ८ वीचीहस्तैः प्रचलितैर्नृत्यंतमिव सर्वतः चंद्रवृद्धिक्षयवशादुद्धृतोर्मिसमाकुलं ९ पांचजन्यस्य जननं रत्नाकरमनुत्तमं गां विंदता भगवता गोविंदेनामितौजसा वराहरूपिणा चांतर्विक्षोभितजलाविलं १० ब्रह्मर्षिणा व्रतवता वर्षाणां शतमत्रिणा अनासादित[illegible]तगाधं च [illegible]पातालैरव्ययं ११ अध्यात्मयोगनिद्रां च पद्मनाभस्य सेवतः युगादिकालशयनं विष्णोरमिततेजसः १२ वज्रपातानसंत्रस्तमैनाकस्याभयप्रदं इति आहवार्दितानां च असुराणां परायणं १३ वडवामुखदीप्ताग्नेस्तोयहव्यप्रदं शिवं अगाधपारं विस्तीर्णमप्रमेयं सरित्पतिं १४ ॥ ॥ ॥ ॥ ॥ ॥

तं ५३

हवेति पाठांतरे दिवो मयपर्वतामाक्रंदः तद्वृत्ति आ[illegible] हवो दिवो मयपद्मनाववंदेइति मेदिनी १३ वडवा अश्वा तस्याः मुखात् संभूतो यो अग्निः तस्मै तोयहव्यप्रदं गाधः पारश्च यस्य न स्तीत अगाधपारं अत एव विस्तीर्णं विशेषेण स्तीर्णं समंततः १४ ॥ ॥ ॥ ॥ ॥ ॥

रा०
७६

अभिसार्यमाणं। अभितो गम्यमानं १५ १६ ते कद्रूविनते। अगाधं दुर्विगाहमार्य १७ अध्यायः नागाश्च संविदं कृत्वेति द्वादशश्लोकमध्यायं केचिन्न पठंति कोश्चित्स्वस्थान्श्लोकान्सर्वे
नैव पठंति। अनेन ह्ययं च षाम्लं सपीसन्नकोशमद्दिंन प्रतीमः संविदं आलोचनं १२ पणिते पणं कृतवसो ३ ४ उत्कोरनकोश्च विशेषणेः समुद्र इति अक्षोभ्यमिसादिना

महानदीभिर्बह्वीभिः स्पर्द्धयेव सहस्रशः अभिसार्यमाणमनिशं ददृशाते महार्णवं १५ आपूर्यमाणमत्यर्थं नृत्यमानमिवोर्मिभिः
गंभीरं तिमिमकरोग्रसंकुलं तं गर्जंतं जलचररावरौद्रनादैः विस्तीर्णं ददृशतुरंबरप्रकाशं ते ऽगाधं निधिमुरुमंभसामनंतं इत्यादिप
र्वणि सौपर्णे १९ सौतिरु च नागाश्च संविदं कृत्वा कर्तव्यमिति तद्वचः निःस्नेहा वै दहेन्माता असंप्राप्तमनोरथा १ प्रसन्ना मोक्षयेद
स्मांस्तस्माच्छापाच्च भाविनी कृष्णं पुच्छं करिष्यामस्तुरगस्य न संशयः २ तथेति गत्वा ते तस्य पुच्छे वाला इति स्मृताः एतस्मिन्नंतरे तत्र सप
त्न्यौ पणिते तदा ३ ततस्ते पणितं कृत्वा भगिन्यौ द्विजसत्तम जग्मतुः परया प्रीत्या परं पारं महोदधेः कद्रूश्च विनता चैव दाक्षायण्यौ वि
हायसा आलोकयंत्यावक्षोभ्यं समुद्रं निधिमंभसां ५ वायुनातीव महता क्षोभ्यमाणं महास्वनं तिमिंगिलसमाकीर्णं मकरैरा
वृतं तथा ६ संयुतं बहुसाहस्रैः सत्वैर्नानाविधैरपि घोरैर्घोरमनाधृष्यं गंभीरमतिभैरवं ७ आकरं सर्वरत्नानामालयं वरुणस्य च
नागानामालयं चापि सुरम्यं सरितां पतिं ८ पातालज्वलनावासमसुराणां तथालयं भयंकराणां सत्वानां पयसो निधिमव्ययं ९॥

५ ८ पातालज्वलनस्य वाडवाग्नेरावासं। असुराणां च वासं धवमिति पाठे शरणं चंधनमिति पाठे कर्णिमारं ९ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

स्मा०
७१

अभ्रंदिव्यममर्त्यानाममृतस्याकरंपरं अप्रमेयमचिंत्यंचसप्तार्णवजलसंमितं १० महानदीभिर्बह्वीभिरलंकृतंमहास्वनं ऐरावणसमरथैन्द्रंस्तंत
मिवचोर्मिभिः ११ इत्येवंतरलतरोर्मिसंकुलंतंगंभीरंविकशितमंबरप्रकाशं पातालज्वलनशिखाविदीपितांगंगर्जंतंद्रुतमथजग्मुरुत्तमास्ते
१२ इत्यादिपर्वणिसौपर्णे २० सोतितृ च तंसमुद्रमतिक्रम्यकद्रूर्विनतयासह न्यपतन्हयाभ्याशेनचिरादिवशीघ्रगा १ ततस्तेतंहय
श्रेष्ठंददृशातेमहाजवं शशांककिरणप्रख्यंकालवालमुभेतदा २ निशम्यचबहून्वालान्कृष्णान्पुच्छसमाश्रितान् विषण्णरूपांविनतांकद्रूर्दास्ये ७४
न्यपोजयत् ३ ततः साविनतातस्मिन्पणितेनपराजिता अभवद्दुःखसंतप्तादासीभावंसमास्थिता ४ एतस्मिन्नंतरेचापिगरुडः का
लआगते विनामाताममहातेजाविदार्याण्डमजायत ५ महासत्त्वबलोपेतः सर्वाविद्योतयन्दिशः कामरूपः कामगमः कामवीर्योविहंगमः
६ अग्निराशिरिवोद्भासन्समिद्धोतिभयंकरः विद्युद्विस्पष्टपिंगाक्षोयुगांताग्निसमप्रभः ७ प्रवृद्धः सहसापक्षीमहाकायोनभोगतः घो
रोघोरस्वनोरौद्रोवह्निरौर्वइवापरः ८ तंदृष्ट्वाशरणंजग्मुर्देवाः सर्वेविभावसुं प्रणिपत्याब्रुवंश्चैनमासीनंविश्वरूपिणं ९ अग्नेमात्वं
प्रवर्द्धिष्ठाः कच्चिन्नोनदिधक्षसि असौहिराशिः सुमहांस्तवसमिद्धस्तवसर्पति १० अग्निरु च ॥ ॥ ॥

उद्भासनादुत्कर्षेणभासमान ७ और्वोवाडवः ८ विभावसुंवह्निं ९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ रम०
७१

२४ अत्रापि पूर्ववत्तस्य पर्यायाधिक्यं यद्येवं स्तूयते नहि विष्णुवाहनेन पक्षिमात्रेण कृतानि सर्वाणि विशेषणान्यंजसा संगच्छते। इंद्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्। एकं सद्विप्रा बहुधा वदंत्यग्निं यमं मातरिश्वानमाहुरिति श्रुतेरिंद्रादिवत्प्रकारेणास्य देवैकमुच्यतः स्तवगमात्तत्र ऋषिः प्राणरूपो मंत्रः मंत्राणां सर्वेषां द्रष्टा मधुच्छंद आदिरूपो वा। महाभागः कृत्स्नयज्ञभोक्ता देवो

नैतदेवं यथा यूयं मन्यध्वमसुरार्दनाः गरुडो बलवानेष मम तुल्यश्च तेजसा २१ जातः परमतेजस्वी विनतानंदवर्द्धनः तेजोराशिमिमं दृष्ट्वा युष्मान्मोहः समाविशत् २२ नागक्षयकरश्चैव काश्यपेयो महाबलः देवानां च हिते युक्तस्त्वहितो दैत्यरक्षसां २३ न भीः कार्या कथं चात्र पश्यध्वं सहिता मम एवमुक्तास्तदा गत्वा गरुडं वाग्भिरस्तुवन् ते दूरादभ्युपेत्यैनं देवाः सर्षिगणास्तदा २४ देवा ऊचुः त्वमृषिस्त्वं महाभागस्त्वं देवः पतगेश्वरः त्वं प्रभुस्तपनप्रख्यस्त्वं नस्त्राणमनुत्तमम् २५ बलोर्मिमान्साधुरदीनसत्वः समृद्धिमान्दुर्विषहस्त्वमेव तत्तः सृतं सर्वमहीनकीर्त्ते ह्यनागतं चोपगतं च सर्वं २६

द्योतमानः पतगानां जीवपक्षिणामीश्वरो नियंता न ह्यावतोऽस्य नसेतीति श्रुतेः प्रभुरंतर्यामीति तपनोऽतःकर्त्ता आख्यापयति प्रकाशयतीति प्रख्यः प्रकाशको जनकश्चेत्यर्थः त्राणं रक्षकः २५ बलस्य गुणस्य ऊर्मिमान्साधुरः अत एव अदीनं रजआदिनानुपक्षीणं सत्वं यस्य सः अत एव समृद्धिरैश्वर्यं तद्वान् दुर्विषहो यद्वेत्तत्तः सृतं निर्गतं सर्वं अहीनकीर्त्ते पराणश्लोक अनागतादिचलमेव २६ ॥

स्वा०
७८

उन्नमग्निन्मात्रः चराचरं चेतनाचेतनं स्थावरं जंगमं वा गभस्तिभिर्दीप्तिजालैः भानुरिव किरणैः अवभाससे प्रकाशयसि ज्ञानरूपेण । यथोक्तं । परागर्थप्रमेयेषु या फलत्वेन संमता । संवित्सैवेह मे
योर्थो वेदांतोक्तिप्रमाणतः इति भानुमतः सूर्यस्य प्रभां तेजो मुहुः ध्रुवाध्रुवं क्षराक्षरं प्रधानपुरुषात्मकं १७ युगपरिवर्त्तनं एकस्मिन्ब्रह्माण्डे सहस्रकल्पो जायमाने तस्य अंतः वल्कन्नी

रि

वर्णं २

त्वमुन्नमं सर्वमिदं चराचरं गभस्तिभिर्भानव वावभाससे समाक्षिपन्भानुमतः प्रभां मुहुस्त्वमंतकः सर्वमिदं ध्रुवाध्रुवं १७ दिवाकरः परिकुपि
तो यथा दहेत्प्रजास्तथा दहन्नसि हुताशनप्रभः भयंकरः प्रलयइवाग्निरुत्थितो विनाशयन्युगपरिवर्तनांतकृत १८ खगेश्वरं शरणमुपाग
तावयं महौजसं ज्वलनसमानवर्चसं तदिष्टमंबितिमिरमध्वगोचरं महोंगरुद्रमुपेत्य खेचरं १९ परावरावरमजय्यविक्रमं तवौजसा सर्व
मिदं प्रतापितं जगत्प्रभीतसमस्वर्गावर्चसा त्वया ह्निमवीश्वरात्म्यहात्मनः २० भयान्विमा[illegible]नमसि विमानगामिनो विमानिना विपथगा
तिंप्रयांतिते क्षयेमृतस्त्वमसि दयावतः प्रभो महात्मनः खगवर कश्यपस्य ह २१ समाकुधः कुरु जगतो दयां परां त्वमीश्वर प्रशमम
पेहि पाहिनः महाशनिस्फुरितसमस्वनेन ते दिशोऽम्बरं त्रिदिव[illegible]मियं च मेदिनी २२ चलंति नः खग त्वदयानिचानिशं निरस्यतां वपु
रिदमग्निसन्निभं तव द्युतिं कुपितकृतांतसन्निभां निशम्य न स्खलतिमनोऽव्यवस्थितं २३ ॥ ॥ ॥ ॥ ॥

कालस्यापि कालइत्यर्थः १८ खगेश्वरं उपेत्य समीपे गत्वा वयं शरणमुपागता इति संबंधः १९ परावरं कारणकार्यं च । अजय्यः जेतुमशक्यो विक्रमो यस्य तं २० विमानगामिनो देवाः
विमानिता अपमानिताः विपथगा तिहीनं मार्गं निस्सृतिं २१ सः त्वं समाकुरु हे क्रोधं समाकर्षीः महाशनेः स्फुरितेन समस्तल्प स्वनः शब्दस्तेन दिशश्चलंती सद्यः नरादयश्च कम्पते २२ निरस्यतो
संक्षिप्तं क्रियतां । अव्यवस्थितमिति छेदः व्याकुलमित्यर्थः ॥ ॥ ॥ ॥ ॥

स्प०
७८

२५ अध्यायः सप्तपर्णाः स्तुतिव्याजेनदेवैर्वोधितः तेष्व आत्मनोदेहं स्वरूपंश्रुत्वाप्रेक्ष्यश्रुत्वाप्रेक्ष्यानुभूयएवसर्वभूतामयायमेष्योवमदेवसर्थः १२ अरुणांमातुर्विवशतयायत्रकुत्रापिक्षितं ३ सर्योदग्धुम नायदाभ्रतदापूर्वांदिशंगत्वातत्रसूर्यस्याग्रेरुणोनिक्षिप्तइतियोज्यं ४ ५ आदित्यम्रंतिंवहुत्वेनचंद्रादित्यैरितिवहुवचनं चंद्रादित्येरेकवचनंचसमाहारात ६ ग्रहेणराहुणाग्रहणेन

सुपर्ण २

प्रसीदनः पतगपतेप्रयाचतांशिवश्चनोभवभगवन्सुखावहः २४ एवंस्तुतः सुपर्णास्तुदेवैः सर्षिगणैस्तदा तेजसः प्रतिसंहारमात्मनः सचका रह २५ इत्यादिपर्वणिसौपर्णोस्तुतिः २१ सौतिरुवाच सश्रुत्वाऽथात्मनोदेहंसुपर्णः प्रेक्ष्यचस्वयं शरीरप्रतिसंहारमात्मनः संप्रचक्रमे १ सुपर्णउवाच नमेसर्वाणिभूतानिविभियुर्देहदर्शनात भीमरूपात्समुद्विग्नास्तस्मात्तेजस्तुसंहृतं २ सौतिरुवाच ततः कामगमः पक्षीकामवीर्योविहंगमः अरुणंचा त्मनः पृष्ठमारोप्यसपितुर्गृहात मातुरंतिकमागच्छत्परंतीरंमहोदधेः ३ तत्रारुणश्चनिक्षिप्तोदिशंपूर्वांमहाद्युतिः सूर्यस्तेजोभिरत्युग्रैर्लोकान्दग्धु मनायदा ४ रुरुउ च किमर्थंभगवान्सूर्योलोकान्दग्धुमनास्तदा किमस्यापहृतंदेवैर्येनेमंमन्युराविशत ५ प्रमतिरुवाच चंद्रादित्यैर्यदाराहु राख्यातोह्यमृतंपिवन वैरानुवंधंकृतवांश्चंद्रादित्येतदानघ ६ वध्यमानेग्रहेणाथआदित्येमन्युराविशत सुरार्थायसमुत्पन्नोरोषोराहोस्तुमांप्रति ७ वह्वनर्थकरंपापमेकोहंसमवाप्नुयां सहायाएवकार्येषुनचकृच्छ्रेषुदृश्यते च पश्यंतिग्रस्यमानंमांसहंतेवैदिवौकसः तस्माल्लोकविनाशार्थंह्य वतिष्ठेनसंशयः ८ ॥ ॥ . ॥ ॥ ॥ ८२ ॥ ॥

वाप्सरसांअर्थायतिहिताय ७ ६ सहंतेमर्षयंतिसहन्देवैरितिपाठेदिवौकसः उपदेवाः मरीच्यादयः प्रजापतयः तस्मात्तेत्रस्तावलंगतेनित्यस्त्रोयेपंचमी ८ ॥ ॥ ॥

संतापयत समंतापयत अत्र भावस्त्वार्थः १० तिरोभूत एव सन्नेवं दहति उदितस्तु भस्मीकरिष्यति लोकानित्याह ततस्तादिना १२ १३ दृश्यन्नपश्यन्नेकं ह्यादेशः कृतिगणत्वाद्दृशेर्विस्तार्थे क १४

एवं कृतमतिः सूर्योस्तमभ्यगमद्गिरिं तस्माल्लोकविनाशाय संतापयत भास्करः १० ततो देवानुपागम्य प्रोवाचेदं महर्षयः अद्यार्द्धरात्रसमये सर्वलो
कभयावहः उत्पत्स्यते महान्दाहस्त्रैलोक्यस्य विनाशनः ११ ततो देवाः सर्षिगणा उपगम्य पितामहं अब्रुवन्किमिवेहाद्य महद्दाहकृतं भयं १२ नता
वद्दृश्यते सूर्यः क्षयोयं प्रतिभाति च उदिते भगवन्भानौ कथमेतद्भविष्यति १३ पितामह उवाच एष लोकविनाशाय रविरुद्यंतुमुद्यतः दृश्यन्ने
वह्निलोकान्भस्मराशीकरिष्यति १४ तस्य प्रतिविधानं च विहितं पूर्वमेव हि कश्यपस्य सुतो धीमानरुणोत्यभिविश्रुतः १५ महाकायो महाते
जाः स स्थास्यति पुरो रवेः करिष्यति च सारथ्यं तेजश्चास्य हरिष्यति १६ लोकानां स्वस्ति चैवं स्यादृषीणां च दिवौकसां १७ प्रमतिरु च ततः
पितामहाज्ञातः सर्वं चक्रे तदारुणः उदितश्चैव सविता स्थगितो न समावृतः १८ एतत्ते सर्वमाख्यातं यत्सूर्यं मन्युराविशत् अरुणश्च यथैवास्य
सारथ्यमकरोत्प्रभुः भूय एवापरं प्रश्नं शृणु पूर्वमुदाहृतं १९ इत्यादिपर्वणि सौपर्णे २२ सौतिरु च ततः कामगमः पक्षी कामकायो म
हाबलः मातुरंतिकमागच्छत्पारं गत्वा महोदधेः यत्र सा विनता तस्मिन्पणितेन पराजिता अतीव दुःखसंतप्ता दासीभावमुपागता २ ततः का
दाचिद्विनतां प्रणतां पुत्रसंन्निधौ काले चाहूय वचनं कद्रूरिदमभाषत ३

प्रतिविधानं प्रतीकारः १५ १६ १७ १८ ॥ ॥

५ अभिमतः संमुखंभवनअभवन ६ अत्रापीन्द्रोपाधिकंब्रह्मस्तूयतेनमस्तस्मादिनालोकस्यपूर्वसंहर्तृत्वादेरलिङ्गस्यदर्शनात ७ १० ज्योतिः विद्रूपं ११ १२ सर्वममृतंमो
क्षः अपेक्षिकेत्यमृतत्वेसर्वत्वंनास्तिमोक्षे ७ वशिष्यमाणंपदद्वयंतत्वमेवेत्यर्थः सोमः ईश्वरः परमैः श्रेष्ठैरर्चितः सोमः पवतेजनितामतीनांजनितादिवोजनितापृथिव्याः जनिता

नागानामालयंभद्रेरम्यंचारुदर्शनं समुद्रकुक्षावेकांतेतत्रमांविनतेनय ४ ततः सुपर्णमातातामवहत्सर्पमातरं पन्नगान् गरुडश्चा
पिमातुर्वचनचोदितः ५ ससूर्यमभितोयातिवैनतेयोविहंगमः सूर्यरश्मिप्रतप्ताश्चमूर्छिताः पन्नगाभवन् ६ तदवस्थान्सुतान्दृष्ट्वाकद्रू
: शक्रमथास्तुवत्नमस्तेसर्वदेवेशनमस्तेवलसूदन नमुचिघ्ननमस्तेस्तुसहस्राक्षशचीपते ७ सर्पाणांसूर्यतप्तानांवारिणात्वंप्लवोभव
त्वमेवपरमंत्राणमस्माकम[illegible]मरोत्तम ८ ईशोह्यसिपयः स्रष्टुंत्वमनल्पंपुरंदर त्वमेवमेघस्त्वंवायुस्त्वमग्निर्वैद्युतोंव
रे ९ त्वमभ्रगणविक्षेप्तात्वामेवाहुर्महाघनं त्वंवज्रमतुलंघोरंघोषवांस्त्वंवलाहकः १० स्रष्टात्वमेवलोकानांसंहर्ताचापराजितः त्वंज्यो
ज्योतिःसर्वभूतानांत्वमादित्योविभावसुः ११ त्वमद्भुतंमहाश्चर्यंत्वंराजात्वंसुरोत्तमः त्वंविष्णुस्त्वंसहस्राक्षस्त्वंदेवस्त्वंपरायणं १२ त्वंसर्वम
मृतंदेवत्वंसोमः परमार्चितः त्वंमुहूर्तस्तिथिस्त्वंचत्वंलवस्त्वंपुनः क्षणः १३ शुक्लस्त्वंवहुलस्त्वंचकलाकाष्ठात्रुटिस्तथा संवत्सरर्तवो
मासारजन्यश्चदिनानिच १४ त्वमुत्तमासगिरिवनावसुंधरासभास्करंवितिमिरमंवरंतथा महोदधिः सतिमिंगिलस्तथैमहोर्मिमा
नवहुमकरोझषाकुलः १५ ॥श्रीरामचंद्रायनमः १५

येर्जनितासूर्यस्यजनितेंद्रस्यजनितोतविष्णोरितिश्रुतिप्रसिद्धः १३ वहुलः कृष्णपक्षः १४ कालेयादानत्वान्नद्र्यपत्यत्वात्काभूत्वोपांवहूपत्वमाहुत्वमुत्तमेति १५ ॥ ॥

त्र्या०
८०

हम १

यज्ञभोक्तापित्वमेवेत्याहापशाइति १९ यज्ञफलप्रदोपित्वमेवेत्याह त्वंविष्णुरिति त्वद्भक्तोस्त्वत्समयेविविदिषंतियज्ञेनेत्यादिश्रुतेः। वेदांगानिषट् यज्ञस्याहरणार्थे। तत्राशिक्षापाठशुद्ध्यर्थं कल्प
: प्रयोगज्ञानार्थं व्याकरणं अशुद्धादिनिवृत्यर्थं छंदोगायत्र्यादिज्ञानार्थं निरुक्तं वेदार्थज्ञानार्थं। ज्योतिषं कर्मकालज्ञानार्थमितिएतान्येववेदांगानि २० त्र्य

महायशास्त्वमितिमहाभिरज्ञसेममनीषिभिर्मुदितमनामहर्षिभिः अभिष्टुतः पिबसिचसोममध्वरेवषट्कृतान्यपिचहवींषिभूतपे १९ त्वंविष्णुः स
ततमिहेज्यसेफलार्थंवेदांगेषद्वत्स्वलोकगीयसेच तद्भक्तोपज्ञनयएयणाद्विजेंद्रावेदांगान्यभिगमयंतिसर्वयत्नैः २० इत्यादिपर्वणिमो
पर्वणि सौतिरुच एवंस्तुतस्तदाकृष्णभगवान्हरिवाहनः नीलजीमूतसंघातैः सर्वमंबरमावृणोत् १ तेमेघाममुचुस्तोयंप्रभूतं
विद्युदुज्वलाः परस्परमिवात्यर्थंगर्जंतः सततंदिवि २ संवर्त्तितमिवाकाशंजलदैः समहाद्भुतैः सृजद्भिरतुलंतोयमजस्रंतुमहारवैः
३ संप्रनृत्तमिवाकाशंधारोर्मिभिरनेकशः मेघस्तनितनिर्घोषैर्विद्युत्पवनकंपितैः ४ तैर्मेघैः सततासारंवर्षद्भिरनिशंतदा नष्टचंद्रा
र्ककिरणमंबरंसमपद्यत ५ नागानामुत्तमोहर्षस्तथावर्षतिवासवे आश्चर्यतमहीचापिसलिलेनसमंततः ६ रसातलमनुप्राप्तंशीत
लंविमलंजलं तदाभवत्तभवच्छन्नाजलोर्मिभिरनेकशः ७ रामणीयकमागच्छन्मात्रासहभुजंगमाः इत्यादिपर्वणिसौपर्णे २४ ॥

६२

ध्यायः २३ एवंहरयोश्वावाहनेरथेयस्यसहरिवाहनः १.२ सवर्त्तैः कल्पांतः संजातोस्मिन्निति संवर्त्तितमिव ३ ४ सततासारंअनवच्छिन्नधारासंपातंयथास्यात्तथा ५ ७ रामणीयकंद्वीपविशेषं ८
अध्यायः २४ ॥ राम ॥ ॥ ॥ ॥ ॥ ॥ ॥ राम०

संध १ तद्वीपंरमणीयकमेव लवणंलवणात्सरं पूर्वंदद्दृशुः पुनर्गमनेसनास्तीतिभावः २ ३ पद्माकरैः सरोभिः ४ नदीसुगमीपदेशैः ५ ७ मनः संहर्षयिजातं मनः संहर्षं जं जनेः सर्वविभक्तपपदाद्दुः प्रजापतेर्योमनः संहर्षः सकल्पोल्लासप्रजत्वा ८ सर्वशरोगितिशेषः ९ १० सरम्यं रतोविरमणीयं ११ १२ दुर्योगातदुष्प्रभावात वितर्यंभ्

म२

सोतिरू च संघद्दृष्टालतोनागाजलधाराद्भुतालदा सपर्वोनोल्यमानास्तेजग्मुस्तंद्वीपमाशुवे १ तद्वीपंमकरावासंविहितंविश्वकर्मणा तत्रतेलवणांघोरंदद्दृशुः सर्वमागताः २ सपर्यामहिताः सर्पाः काननंदेवनोरमं सागरांबुविनिक्षिप्तंपक्षिसंघनिनादितं ३ विचित्र फलपुष्पाभिर्वनराजीभिराहृतं भवनैरावृतंरम्यैस्तथापद्माकरैरपि ४ प्रसन्नसलिलैश्चापिहृदैर्दिव्यैर्विभूषितं दिव्यगंधवहैःपुष्पै र्मारुतैरुपवीजितं ५ उत्पतद्भिरिवाकाशंवृक्षैर्मलयजैरपि शोभितंपुष्पवर्षाणिमुंचद्भिर्मारुतेरितैः ६ वायुविक्षिप्तकुसुमैस्तथान्यै रपिपादपैः किरद्भिरिवतत्रस्थान्नागान्पुष्पांबुवृष्टिभिः ७ मनः संहर्षजंदिव्यंगंधर्वाप्सरसांप्रियं मत्तभ्रमरसंघुष्टंमनोज्ञाकृतिदर्शनं ८ रमणीयंशिवंपुण्यंसर्वैर्जनमनोहरं नानापक्षिरुतंरम्यंकद्रूपुत्रप्रहर्षणं ९ तत्तेवनंसमासाद्यविजह्रुः पन्नगास्तदा अब्रुवंश्चमहावी र्यंसुपर्णंपतगेश्वरं १० वहास्मानपरंद्वीपंसुरम्यंविमलोदकं त्वंहिदेशान्बहून्रम्यान्व्रजन्पश्यसिखेचर ११ सविचिंत्याब्रवीत्सर्पीमातरंवि नतांतदा किंकारणंमयामातः कर्तव्यंसर्पभाषितं १२ विनतोवाच दासीभूतास्मिदुर्योगात्सपत्न्याःपतगोत्तम पणंवितथमा स्थाय्प्रपपसपैरुपधिनाकृतं १३

भिः५

क्रेपिकृष्टमलंसपैर्वालमृतैः उपधिनाच्छलेन १३ ॥ ॥ श्रीरामायनम ॥ ॥ ॥ ॥ ॥ ॥

कि १

१४ धनक्रीतो विद्यार्थी पणजितो वा दासः करोति तेषां मुक्तिः दानेन विद्यालाभेन पणान्तरजयेन वा भवतीति किमेतेषु मया कर्तव्यमित्याह किमित्याहमिति लेलिहाः भोः सर्पाः १५ १६ अध्यायः

तस्मिंस्तु कथिते मात्रा कारणे गगनेचरः उवाच वचनं सर्पांस्तेन दुःखेन दुःखितः १४ किमाहृत्य विदित्वा वा किं वा कृत्वेह पौरुषं दास्याद्वो विप्रमुच्येयं तथ्यं वदत लेलिहाः १५ सौतिरु च श्रुत्वा तमब्रुवन्सर्पा आहरामृतमोजसा ततो दास्याद्विप्रमोक्षो भविता तव खेचर २६ इत्यादिपर्वणि सौपर्णे २५ सौतिरु च इत्युक्तः गरुडः सर्पैस्ततो मातरमब्रवीत् गच्छाम्यमृतमाहर्तुं भक्ष्यमिच्छामि वेदितुं १ विनतो च समुद्रकुक्षावेकान्ते निषादालयमुत्तमं निषादानां सहस्राणि तान्भुक्त्वामृतमानय। २ न च ते ब्राह्मणं हन्तुं कार्या बुद्धिः कथंचन अवध्यः सर्वभूतानां ब्राह्मणो ह्यनलोपमः ३ अग्निरर्को विषं शस्त्रं विप्रो भवति कोपितः एवमादिभिरूपैस्तु सतां वै ब्राह्मणो मतः ४ स ते तात न हन्तव्यः संक्रुद्धेनापि सर्वथा ब्राह्मणानामभिद्रोहो न कर्तव्यः कथंचन ५ न त्वेवमग्निर्नादित्यो भस्म कुर्यात्तथानघ यथा कुर्यादति क्रुद्धो ब्राह्मणः संशितव्रतः ६ तदेतैर्विविधैर्लिंगैस्त्वं विद्यास्तं द्विजोत्तम भूतानामग्रभूर्विप्रो वर्णश्रेष्ठः पिता गुरुः ७ गरुड उ च किं रूपो ब्राह्मणो मातः किंशीलः किंपराक्रमः किंस्विदग्निनिभो भाति किंस्वित्सौम्यप्रदर्शनः ८ यथाहमभिजानीयां ब्राह्मणं लक्षणैः शुभैः तन्मे कारणतो मातः पृच्छतो वक्तुमर्हसि ९ विनतो च यस्ते कंठमनुप्राप्तो निगीर्णं बडिशं यथा दहेदंगारवत्तात तं विद्याद्ब्राह्मणर्षभं १० विप्रस्त्वया न हन्तव्यः संक्रुद्धेनापि सर्वदा प्रोवाच चैनं विनता पुत्रहार्दादिदं वचः जठरे न च जीर्येद्यस्तं जानीहि द्विजोत्तमं ११ ॥ ॥ ॥ ॥ ॥ ॥ ॥

२४ इत्य ९ वडिशं मत्स्यादिधरणार्थो गलग्रहः १० हार्दमिति स्नेहात ११ ११ ११ ११ ११ ११ ११

चञ्चिणोडि·त्करणतज्ज्ञापकादनुदात्तेत्वलक्षणस्यानित्यत्वादासेःशतृप्रत्ययः १

१२ विप्रकृतांवंचितां १३ १४ आसतीतिपाठेप्यासीनैवेत्यर्थः स्वस्तिकरे कल्याणकरोः अरिष्टं निर्विघ्नं यथास्यात्तथा १५ कालेसमये १ भूधरजान्पर्वतजान्वृक्षान्। १७ भुजंगभो

ऽनः प्रोवाचविनतापुत्रस्तांदीदृशंवचः ज्ञानेनपश्यतत्वेवीर्यमीशीर्वादपरायणा १२ पीतापरमदुःखार्त्तानयैर्विप्रकृतामतीः १३ पक्षीते
मातःपातुचंद्रसूर्यौचपृष्ठतः शिरश्चपातुवह्निस्तेवसवः सर्वतस्तनुं १४ अहंचतेसदापुत्र शांतिस्वस्तिपरायणा इहासीनाभविष्यामि
शांतिः स्वस्तिकरेरता अरिष्टंव्रजपंथानंपुत्रकार्यार्थसिद्धये १५ सौतिस्तु च ततः समातुर्वचनंनिशम्यवितत्यपक्षौनभउत्पपात ततो
निषादान्बलवानुपागतोबुभुक्षितः कालइवांतकोपरः १६ सतान्निषादानुपसंहरंस्तदारजः समुद्धूय नभःस्पृशंमहत् समु
द्रकुक्षौचविशोषयन्पयः समीपजान्भूधरजान्विचालयन् १७ ततः सचक्रेमहदाननंतदानिषादमार्गंप्रतिरुद्धपक्षिराट् ततोनि
षादास्त्वरिताः प्रवव्रजुर्यतोमुखंतस्यभुजंगभोजिनः १८ तदाननंविवृतमतिप्रमाणवत्समभ्ययुर्गगनमिवार्दिताः खगाः सहस्रशःप्र
वनाजोविमोहितायथानिलप्रचालितपादपेवने १९ ततः खगोवदनममित्रतापनः समाहरत्परिचपलोमहाबलः निषूदयन्बहुवि
धमत्स्यजीविनोबुभुक्षितोगगनचरेश्वरस्तदा २० इत्यादिपर्वणिसौपर्णे॥ सौतिस्तु च तस्यकंठमनुप्राप्तोब्राह्मणः सहभार्यया दहन्दी
प्तइवांगारस्तमुवाचांतरिक्षगः १ द्विजोत्तमविनिर्गच्छतूर्णमास्यादपावृतात् नहिमेब्राह्मणोवध्यः पापेष्वपिरतःसदा २ ॥ ॥

जिनोगरुडस्य १८ १९ परिचपलः तेषांयत्नरणायपरवर्ततोभ्रमन् २० अध्यायः २८ तस्य २ ॥ ध ॥ छ ॥ ध ॥ छ ॥ छ ॥

३ संभावयजीवय ४ पृष्टश्चाख्यातवान्सर्ववृत्तमात्मनीसा ७ वः युष्माकंमात... भ्रातापेहृत्यावहुलं ८ भोजनेवहुलेविषयेममकुशलं नहि तृप्तिप्रभावात् ९ सोमंअमृतं २०

ब्रुवाणमेवंगरुडंब्राह्मणःसमभाषत निषादीममभार्येयंनिर्गच्छतुमयासह ३ गरुडउ च एतामपिनिषादींत्वंपरिगृह्याशुनिःपत
तशीघ्रंसंभावयात्मानमजीर्णंममतेजसा ४ सौतिरु च ततःसविप्रोनिष्क्रांतोनिषादीसहितस्तदा वर्द्धयित्वाचगरुडमिष्टंदेशंजगामह
५ सहभार्येविनिष्क्रांतेतस्मिन्द्विजेचपक्षिराट् विततपक्षावाकाशमुत्पपातमनोजवः ६ ततोपश्यत्सपितरंपृष्टश्चाख्यातवान्पितुः यथान्या
यममेयात्मातंचोवाचमहानृषिः ७ कश्यपउ च कच्चिद्वःकुशलंनित्यंभोजनेबहुलंसुत कच्चिच्चमानुषेलोकेतवान्नंविद्यतेबहु ८
गरुडउ च मातामेकुशलाशश्वत्तथाभ्रातातथाप्यहं नहिमेकुशलंतातभोजनेबहुलेसदा ९ अहंहिसर्पैःप्रहितःसोममाहर्तुमु
त्तमं मातुर्दास्यविमोक्षार्थमाहरिष्येतमद्यवै १० मात्राचात्रसमादिष्टोनिषादान्भक्षयेतिह नचमेतृप्तिरभवद्भक्षयित्वासहस्रशः ११ त
स्माद्भक्ष्यंत्वमपरंभगवन्प्रदिशस्वमे यद्भुक्त्वामृतमाहर्तुंसमर्थःस्यामहंप्रभो १२ क्षुत्पिपासाविघातार्थंभक्ष्यमाख्यातुमेभवान् १३ ॐ
कश्यपउ च इदंसरोमहापुण्यंदेवलोकेपिविश्रुतं यत्रकूर्मोग्रजंहस्तीसदाकर्षत्यवाङ्मुखः १४ तयोर्जन्मांतरेवैरंसंप्रवक्ष्याम्यशे
षतः तन्मेतत्त्वंनिबोधत्वंयत्प्रमाणौचतावुभौ १५ आसीद्विभावसुर्नाममहर्षिःकोपनोभृशं भ्रातातस्यानुजश्चासीत्सुप्रतीकोमहात

२१ २२ २३ कूर्माग्रजं कूर्मस्तंज्येष्ठभ्रातरं २४ २५ २६ ॥ ॥ ॥ ॥ ॥ ॥ ॥

विभागं करिष्यामीति कीर्तयत्येवं न त्कृतवान् १७ १८ अमित्राः शत्रवः १९ अंतरेषु छिद्रेषु पतंति। अन्यो[न्य१]न्यच्छिद्राणि वहुलीकृत्य नाशहेतवे वैरमुद्दीपयंतीत्यर्थः २० कनिष्ठास्तत्र

[चा १]

स नेच्छति धनं भ्रात्रा सहैकस्थं महामुनिः विभागं कीर्तयत्येव सुप्रतीको हि नित्यशः १७ अथाब्रवीच्च तं भ्राता सुप्रतीकं विभावसुः विभागं वहवो मोहात्कर्तुमिच्छंति नित्यशः ततो विभक्ता ह्यन्योन्यं विरुध्यंतेर्थमोहिताः १८ ततः स्वार्थपरान्मूढान्पृथग्भूतान्स्वकैर्धनैः विदित्वा भेदयंत्येतान मित्रा मित्ररूपिणः १९ विदित्वा चापरे भिन्नानंतरेषु पतंत्यथ भिन्नानामतुलो नाशः क्षिप्रमेव प्रवर्त्तते २० तस्माच्चैव विभागं न प्रशंसंति साधवः गुरुशास्त्रे निवद्धानामन्योन्येनाभिशंकिनां नियंतुं न हि शक्यस्त्वं भेदतो धनमिच्छसि यस्मात्तस्मात्सुप्रतीक हस्तित्वं समवाप्स्यसि २२ शप्तस्त्वेवं सुप्रतीको विभावसुमथाब्रवीत् त्वमप्यंतर्जलचरः कच्छपः संभविष्यसि २३ एवमन्योन्यशापात्तौ सुप्रतीकविभावसू गजकच्छपतां प्राप्तावर्थार्थं मूढचेतसौ २४ रोषदोषानुषंगेण तिर्यग्योनिगतावुभौ परस्परद्वेषरतौ प्रमाणबलदर्पितौ २५ सरस्यस्मिन्महाकायौ पूर्ववैरानुसारिणौ तयोरेकतरः श्रीमान्समुपैति महागजः २६ यस्य बृंहितशब्देन कूर्मोप्यंतर्जलेशयः उत्थितोसौ महाकायः कृत्स्नं विक्षोभयन्सरः २७ यं दृष्ट्वावेष्टितकरः पतत्येष गजो जले दंतहस्ताग्रलांगूलपादवेगेन वीर्यवान् २८ ॥

वसरूपे ज्येष्ठे भ्राता पितृः समः इति गुरुशास्त्रे अलंघनीये शास्त्रे निवद्धानां अतिशंकिनां मर्यादाभंगभयेन २० २३ आख्यानतात्पर्यमाह एवमिति लोभात्मसीयो गितिर्निं गच्छंतीति भावः २४ २७
आवेष्टितः कुंडलीकृतशुंडादंडः २८ ॥

ईप्सितं ईप्सितं ३१ ३३ ते तव भवं बलं दास्यंतीति शेषः ३४ ३६ सोऽलंबं निरालंबं यथास्यात्तथा गगनमार्गेणालंबतीर्थं भक्षणार्थं देवमेरुशृंगं आसाद्य वृक्षानुपारोहत् ३७ तोयस्थानक

विक्रोशमानस्ततो नागः सरो वृक्षद्रुमाकुलं कूर्म्मोप्यभ्युद्यतशिराः युद्धायाभ्येति वीर्यवान् २९ षडुच्छ्रितो योजनानि गजस्तद्द्विगुणायतः
कूर्म्मस्त्रियोजनोत्सेधो दशयोजनमंडलः ३० तावुभौ युद्धसंपन्नौ परस्परवधैषिणौ उपयुज्याशु कर्म्मेदं साधयेप्सितमात्मनः ३१ सो
ति रु च इत्युक्त्वा गरुडं सोथ मांगल्यमकरोत्तदा युध्यतः सह देवैस्ते युधि भवतु मंगलं ३२ पूर्णकुंभो द्विजा गावो यच्चान्यत्किंचि
दुत्तमं शुभं स्वस्त्ययनं चापि भविष्यति तवांडज ३३ युध्यमानस्य संग्रामे देवैः सार्द्धं महाबल ऋचो यजूंषि सामानि पवित्रा
णि हवींषि च रहस्यानि च सर्वाणि सर्वे वेदाश्च ते बलं ३४ इत्युक्तो गरुडः पित्रा गतस्तं ह्रदमंतिकात् अपश्यन्निर्मलजलं ना
नापक्षिसमाकुलं ३५ स तत्स्मृत्वा पितुर्वाक्यं भीमवेगोंऽतरिक्षगः नखेन गजमेकेन कूर्ममेकेन चाक्षिपत् ३६ समुत्पपात
चाकाशं तत उच्चैर्विहंगमः सोलंबतीर्थमासाद्य देववृक्षानुपागमत् ३७ ते भीताः समकंपंत तस्य पक्षानिलाहताः न नो भंज्यादि
ति तदा दिव्याः कनकशाखिनः ३८ प्रचलांगान्स तान्दृष्ट्वा मनोरथफलद्रुमान् अन्यानतुलरूपांगानुपचक्राम खेचरः ३९
कांचनै राजतैश्चैव फलैर्वैडूर्यशाखिनः सागरांबुपरिक्षिप्तान्भ्राजमानान्महाद्रुमान् ४० तमुवाच खगश्रेष्ठं तत्र रौहिणपादपः
अतिप्रवृद्धः सुमहानापतंतं मनोजवं ४१ ॥ के४ ॥ ॥ ॥

नकशाखिनः कनकावृता वृक्षाः ३८ ४० रौहिणो रोहिणो वटः स्वार्थे तद्धितः एकस्वावयवात् रोहिणो रोहितके श्वच्छवटपादपयोः उमानि तिमेदिनी ४१ ४२ ॥

४३ अध्यायः २७ समाप्त ५ अतिदेवं देवैरपिकर्तुमशक्यं ६ गुरुमिति गुरुशब्दः पूर्वोक्तोद्दिष्टः विहाय समागतो अस्मानदः आदेः कारश्च एषोदरादित्वात् गरुड़शब्दः सर्थः ७ ८

एषा ममन्महाशाखा शतयोजनमायता एतामास्थाय शाखांत्वंखादेमौगजकच्छपौ ४२ ततो द्रुमंपतगसहस्रवेगो महीधरप्रतिमवपुः प्रकंपयन् खगोत्तमो द्रुतमभिपत्य वेगवान्बभंज तामविरलपत्रसंचयां ४३ इत्यादिपर्वणि सौपर्णे २९ सौतिरुवाच स्पृष्टमात्रा तु पद्भ्यां सा गरुडेन बलीयसा अभज्यत तरोः शाखा भग्नां चैनामधारयत् १ तां भंक्त्वा स महाशाखां स्मयमानो विलोकयन् अथात्र लंबतोपश्यद्वालखिल्यानधोमुखान् २ ऋषयो ह्यत्र लंबंते न हन्यामिति तानृषीन् तपोरतान्लंबमानान्ब्रह्मर्षीनभिवीक्ष्य सः ३ हन्यादेतान्संपतंती शाखेत्यथ विचिंत्य सः नखैर्दृढतरंवीरः सं[गृह्य]गजकच्छपौ ४ स तद्विनाशसंत्रासादभिपत्य खगाधिपः शाखामास्येन जग्राह तेषामेवान्ववेक्षया ५ अतिदैवं तु तत्तस्य कर्म दृष्ट्वा महर्षयः विस्मयोत्कंपहृदया नाम चक्रुर्महाखगे ६ गुरुंभारं समासाद्योड्डीन एष विहंगमः गरुडस्तु खगश्रेष्ठस्तस्मात्पन्नगभोजनः ७ ततः शनैः पर्यपतत्पक्षैः शैलान्प्रकंपयन् एवं सोभ्यपतद्देशान्बहून्सगजकच्छपः दयार्थं वालखिल्यानां न च स्थानमविंदत ८ स गत्वा पर्वतश्रेष्ठं गंधमादनमंजसा ददर्श पितरं तत्र कश्यपं तपसि स्थितं १० ददर्श तं पिता चापि दिव्यरूपं विहंगमं तेजोवीर्यबलोपेतं मनोमारुतरंहसं ११ शैलशृंगप्रतीकाशं ब्रह्मदंडमिवोद्यतं अचिंत्यमनभिध्येयं सर्वभूतभयंकरं १२ ॥श्रीरामायनमः॥राम॥

गट५

नेबा५

९ १० ११ अचिंत्यं अद्भुताकारत्वात् अनभिध्येयं क्रूरमूर्तित्वात् तदेवाह सर्वेति २२ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥

२५ वालखिल्याः नामतः मरीचिपाः सूर्यमरीचीनेव पीत्वा तप्यंति अमीच आदित्योदेवमधुरसादिनां छांदोग्यप्रसिद्धमधुविद्याविद इत्यर्थः १६ १८ शाखां मुक्त्वा गिरिं प्रसन्नप्रययुरिति संबंधः
१९ शाखायामवछेपाव्याप्तिसंविकलं वचनक्रिया यस्य स तथा । अयमक्षरार्थो यथा स्यात्तथा स्पष्टादित्यर्थः २० २३ गजकच्छपयोः परिमाणमुक्तं शाखायास्तदाहूनताभि

श्रा० ८४

महावीर्यधरं रौद्रं साक्षादग्निमिवोद्यतं अप्रधृष्यमजेयं च देवदानवराक्षसैः १३ भेत्तारं गिरिशृंगाणां समुद्रजलशोषणं लोकसंलोडनं घोरं
कृतांतसमदर्शनं १४ तमागतमभिप्रेक्ष्य भगवान्कश्यपस्तदा विदित्वा चास्य संकल्पमिदं वचनमब्रवीत् १५ कश्यप उ० च पुत्र मा सा
हसं कार्षीर्मा सद्यो लप्स्यसे व्यथां मा त्वां दहेयुः संक्रुद्धा वालखिल्या मरीचिपाः १६ सौतिरु० च ततः प्रसादयामास कश्यपः पुत्रका
रणात् वालखिल्यान्महाभागांस्तपसा हतकल्मषान् १७ कश्यप उ० च प्रजाहितार्थमारंभो गरुडस्य तपोधनाः चिकीर्षति महत्क
र्म तदनुज्ञातुमर्हथ १८ सौतिरु० च एवमुक्ता भगवता मुनयस्ते समभ्ययुः मुक्त्वा शाखां गिरिं पुण्यं हिमवंतं तपोर्थिनः १९ ततस्ते
ष्वपयातेषु पितरं विनतात्मजः शाखाव्याक्षिप्तवदनः पर्यपृच्छत कश्यपं २० भगवन्क्व विमुंचामि तरोः शाखामिमामहं वर्जितं मानुषैर्देशं
माख्यातु भगवान्मम २१ ततो निःपुरुषं शैलं हिमसंरुद्धकंदरं अगम्यं मनसाप्यन्यैस्तस्याचख्यौ स कश्यपः २२ तं पर्वतमहाकुक्षिमा
विश्य मनसा खगः जवेनाभ्यपतत्तार्क्ष्यः सशाखागजकच्छपः २३ न तां वध्री परिणाहे शततर्व्मा महातनुः शाखिनो महतीं शाखां यां प्रगृ
ह्य ययौ खगः २४ ॥ ॥ ॥ ॥ ॥ ॥
म ३

तिपरिणाहे तत्परितो वध्रीयात वेष्टयेत । व्रध्री एकतंतकवर्मात्रः शतवर्माणएकेनागोचर्मणाकृतयात्वा आक्रांता भूर्गोचर्ममात्री इयंत शतगोचर्मरज्वाप्यनाक्रमणीयेत्यतिप्रमत्त्वमुक्तं शाखायाः २४ ॥

एम० ८४

२९ हेमविकचाः हेमवदुज्ज्वलाः ३० ३३ सधूमेति। दिवाग्न्यद्धि ३४ अभूतपूर्वंयथास्यात्तथाद्रवत्प्रहरणामायुधंअन्योन्यमभिद्रावयौगौकवचनं ३६ सनिर्घाताः अशनिपातसहिता

ने१

सततः शतसाहस्रंयोजनांतरमागतः कालेननातिमहतागरुडः पर्वतेश्वरः २५ सतंगत्वाक्षणेनैवपर्वतंवचनात्पितुः अमुंचन्मह
तीशाखांसस्वनंतत्रखेचरः २६ पक्षानिलहतस्तस्यप्राकंपतसशैलराट् मुमोचपुष्पवर्षंचसमागलितपादपः २६ शृंगाणिचव्य
शीर्यंतगिरेस्तस्यसमंततः मणिकांचनचित्राणिशोभयंतिमहागिरिं २८ शाखिनोबहवस्तस्यापिशाखयाभिहतास्तथा कांचनैःकु
सुमैर्भांतिविद्युत्वंतइवांबुदाः २९ तेहेमविकचाभूमौ[illegible]ताः पर्वतधातुभिः व्यराजन्शाखिनस्तत्रसूर्यरश्मिपरिरंजिताः ३० ततस्तस्य
गिरेः शृंगमास्थायसखगोत्तमः भक्षयामासगरुडस्तावुभौगजकच्छपौ ३१ तावुभौभक्षयित्वातस्मतार्क्ष्यः कूर्मकुंजरौ ततःप
र्वतकूटाग्रादुत्पपातमहाजवः ३२ प्रावर्त्तंताथदेवानामुत्पाताःभयशंसिनः इंद्रस्यवज्रंदयितंप्रजज्वालभयात्ततः ३३ सधूमासतेज्वाला प
विदिवोल्कानभसश्च्युता तथावसूनांरुद्राणामादित्यानांचसर्वशः साध्यानांमरुतांचैवयेचान्येदेवतागणाः स्वंस्वंप्रहरणंतेषांपरस्प
रमुपाद्रवत् अभूतपूर्वंसंग्रामेतदादेवासुरेपिच ३६ ववुर्वाताः सनिर्घाताःपेतुरुल्काः सहस्रशः निरभ्रमेवचाकाशंप्रजगर्ज
महास्वनं ३७ देवानामपियोदेवः सोप्यवर्षतशोणितं मम्लुर्माल्यानिदेवानांनेशुस्तेजांसिचैवहि ३८ उत्पातमेघाःरौद्राश्चव
वृषुःशोणितंबहु ॥ ॥ ॥ ॥ ॥ ॥

ःउल्काः वह्निविस्फुलिंगसंघाः ३७ देवानांदेवः पर्जन्यः ३८ ३९

अपाराधान्वालखिल्यैर्वमानात्प्रमादात्स्ववलदर्पेणानवधानात् ४२ ४३ असाध्यमन्येषामितिशेषः ४४ ४५ ४६ ४८ भानुमंति ४९ ५० ५१ स्वदे

श्या०

६५

श्र२ ताः

रक्षांसिमुकुटांस्तेषामुच्छ्रितानिप्रधर्षयन् ३९ ततस्त्राससमुद्विग्नः सहदेवैः शतक्रतुः उत्पातान्दारुणान्पश्यन्निदमुवाचबृहस्पतिं ४० इंद्रउ
च किमर्थंमैवन्घोराउत्पाताः सहसोत्थिताः नचशत्रुंप्रपश्यामियुधियोनः प्रधर्षयेत ४१ बृहस्पतिरुवाच तवापराधादेवेंद्रप्रमादाच्चशतक्रतोः
तपसावालखिल्यानांमहर्षीणांमहात्मनां ४२ कश्यपस्यमुनेःपुत्रोविनतायाश्चखेचरः हर्तुंसोममभिप्राप्तोबलवान्कामरूपधृक् ४३
समर्थोबलिनांश्रेष्ठोहर्तुंसोमंविहंगमः सर्वंसंभावयाम्यस्मिन्नसाध्यमपिसाधयेत ४४ सौतिरुवाच श्रुत्वैतद्वचनंशक्रः प्रोवाचामृतरक्षिणः
महावीर्यबलः पक्षीहर्तुंसोममिहोद्यतः ४५ युष्मान्संबोधयाम्येषयथानसहरेद्बलात् अतुलंहिबलंतस्यबृहस्पतिरुवाचह ४६ तच्छ्रु
त्वाविबुधावाक्यंविस्मितायत्नमास्थिताः परिवार्यामृतंतस्थुर्वज्रीचेंद्रः शतायवान् ४७ धारयंतोविचित्राणिकांचनानिमनस्विनः कवचा
निमहार्हाणिवैडूर्यविकृतानिच ४८ चर्माण्यपिचगात्रेषुभानुमंतिदृढानिच विविधानिचशस्त्राणिघोररूपाण्यनेकशः ४९ सित
तीक्ष्णाग्रधाराणिसमुद्यम्यसुरोत्तमाः सविस्फुलिंगज्वालानिसधूमानिचसर्वशः ५० चक्राणिपरिघांश्चैवत्रिशूलानिपरश्वधान् शक्तीश्च
विविधास्तीक्ष्णाःकरवालांश्चनिर्मलान् ५१ स्वदेहरूपाण्यादायगदाश्चोग्रप्रदर्शनाः तैः शस्त्रैर्भानुमद्भिस्तेदिव्याभरणभूषिताः भानु
मंतःसुरगणास्तस्थुर्विगतकल्मषाः ५२

हररूपाणिस्वदेहस्यानुरूपाणि ५२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम०

५५

ज्वलनवत्समिद्धैर्दीप्यमानैर्वपुर्भिर्विकाशिन: ५३ विगलितमिवत्र कस्मात्रागतमिव ५४ अध्याय: कोपेति॥ यजत: यजमानस्य। वर्त्तमानसामीप्ये वर्त्तमानवन्निर्देश: ५

अनुपमबलवीर्यतेजसो धृतमनस: परिरक्षणेऽमृतस्य असुरपुरविदारणा: सुरा ज्वलनसमिद्धवपु: प्रकाशिनश्च भवे ५३ इति समरवरांग
णे: स्थितास्ते परिघसहस्रशतै: समाकुलं विगलितमिव चांबरांतं तपनमरीचिविकाशितं बभौ ५४ इ त्यादिपर्वणि सौपर्णे २८ शौनक
उ च कोपराधो महेंद्रस्य क: प्रमादश्च सूतज तपसा वालखिल्यानां संभूतो गरुड: कथं १ कश्यपस्य द्विजातेश्च कथं वै पक्षिराट् सुत:
अधृष्य: सर्वभूतानामवध्यश्चाभवत्कथं २ कथं च कामचारी स कामवीर्यश्च खेचर: एतदिच्छाम्यहं श्रोतुं पुराणे यदि पठ्यते ३ सौतिरुवाच वि
षयोयं पुराणस्य यन्मां त्वं परिपृच्छसि शृणु मे वदत: सर्वमेतत्संक्षेपतो द्विज ४ यजत: पुत्रकामस्य कश्यपस्य प्रजापते: साहाय्यमृषयो देवा गं
धर्वाश्च ददु: किल तत्रेध्मानयने शक्रो नियुक्त: कश्यपेन ह मुनयो वालखिल्याश्च ये चान्ये देवतागणा: ६ शक्रस्तु वीर्यसदृशमिध्मभारं गि
रिप्रभं समुद्यम्यानयामास नातिकृच्छ्रादिव प्रभु: ७ अथापश्यदृषीन्ह्रस्वानंगुष्ठोदरवर्ष्मण: पलाशवृंतिकामेकां वहत: संहतान्पथि ८
प्रलीनान्स्वेष्विवांगेषु निराहारांस्तपोधनान् क्लिश्यमानान्मंदबलान् गोष्पदे संप्लुतोदके ९ ॥ ॥ ॥ ॥ ॥

यजमानस्येत्यर्थ: ५ इध्म: अग्निं समिंधनार्था: समिध: ६ ७ अंगुष्ठोदरवर्ष्मण: वर्ष्म शरीरं येषां तान् पलाशवृंतिकां दीर्घपर्णं ८ स्वेष्वंगेषु लीनानिव कृशातिकृशा इत्यर्थ: गोष्पदमात्रेपि जले मज्जनेनेत्यर्थ: ९ ॥ ॥ ॥ ॥ ॥ ॥ ॥९

जातमन्यवः दीर्णैः मन्युं हे क्रतौ क्रुद्धा इति कोशः ११ १२ यावदिच्छितं वीर्यं गतिश्च यस्येति कामवीर्यः कामगमश्च १३ दारुणाः इंद्रप्र[illegible]सेव १४ १५ कर्मसिद्धिमपृच्छत सिद्धं वः कर्म

सं॰४

तान्सर्वान्विस्मयाविष्टो वीर्योन्मत्तः पुरंदरः अवहस्याभ्यगाच्छीघ्रं लंघयित्वावमन्य च १० तेथ रोषसमाविष्टाः सुभृशं जातमन्यवः आरेभिरे महत्कर्म त

दा शक्रभयंकरम् ११ जुहुवुस्ते सुतपसो विधिवज्जातवेदसं मंत्रैरुच्चावचैर्विप्रा येन कामेन तच्छृणु १२ कामवीर्यः कामगमो देवराजभयप्र

दः इंद्रोन्यः सर्वदेवानां भवेदिति यतव्रताः १३ इंद्राच्छतगुणः शौर्ये वीर्ये चैव मनोजवः तपसो नः फलेनाद्य दारुणः संभवत्विति १४

तद्बुध्वा भृशसंतप्तो देवराजः शतक्रतुः जगाम शरणं तत्र कश्यपं संशितव्रतं १५ तच्छ्रुत्वा देवराजस्य कश्यपोथ प्रजापतिः वालखिल्यानुपा

गम्य कर्मसिद्धिमपृच्छत १६ एवमस्त्विति तं चापि प्रत्यूचुः सत्यवादिनः तान्कश्यप उवाचेदं सांत्वपूर्वं प्रजापतिः १७ अयमिंद्रस्त्रिभुव

ने नियोगाद्ब्रह्मणः कृतः इंद्रार्थे च भवंतोपि यत्नवंतस्तपोधनाः १८ न मिथ्या ब्रह्मणो वाक्यं कर्तुमर्हथ सत्तमाः भवतां हि न मिथ्यायं सं

कल्पो वै चिकीर्षितः १९ भवत्वेष पतत्रीणामिंद्रोतिबलसत्ववान् प्रसादः क्रियतामस्य देवराजस्य याचतः २० एवमुक्ताः कश्यपेन वा

लखिल्यास्तपोधनाः प्रत्यूचुरभिसंपूज्य मुनिश्रेष्ठं प्रजापतिं २१ वालखिल्या ऊचुः इंद्रार्थोयं समारंभः सर्वेषां नः प्रजापते अपत्यार्थं स

मारंभो भवतश्चायमीप्सितः २२ ॥ ॥ ॥ ॥ ॥

पं

सपृच्छद्विसर्गः १६ एवमस्तु सिद्धमस्तु १७ १९ पतत्रीणां पक्षिणां पतेरनिसौगादिकान्निम्नस्य यो तौविप्रि [illegible] पततत्रपरस्मरः २० २१ २२ ॥ ॥

२४ पुंसवेनेक्तकाले २५ २२ कारपिष्यतइतिस्वार्थेगीवरामोराज्ञमचीकरदितिवत् २७ दर्यान्नैत्वया ३२ ३३ गरुडः इंद्रत्वेनानरः हिरण्यगर्भः अभ्यषिंचत। अत्र प्र८ मिंचेत

तदिदं सफलं कर्म त्वयैव प्रतिगृह्यतां तथाचैवर्षीं बालखिल्यांश्चैपोनुपश्यसि २३ एतस्मिन्नेवकालेतुदेवीदाक्षायणीशुभा विनताना मकल्याणीपुत्रकामायशस्विनी २४ तपस्तप्त्वाव्रतपरास्नातापुंसवनेशुचिः उपचक्रामभर्त्तारंतामुवाचाथकश्यपः आरंभः सफलो देविभवितायस्त्वयेप्सितः जनयिष्यसिपुत्रौद्वौवीरौत्रिभुवनेश्वरौ २६ तपसावालखिल्यानांममसंकल्पजौतथा भविष्यतोमहाभागौपु त्रौलोकप्रपूजितौ २७ उवाचचैनांभगवान्कश्यपः पुनरेवह धार्यतामप्रमादेनगर्भोयंसुमहोदयः २८ एतौसर्वपतत्रीणामिंद्रत्वंकारयि पी५ ष्यतः लोकसंभावितौवीरौकामरूपौविहंगमौ २९ शतक्रतुमथोवाचप्रीयमाणःप्रजापतिः त्वत्सहायौमहावीर्यौभ्रातरौतेभविष्यतः ३० नै ताभ्यांभवितादोषः सकाशात्तेपुरंदर अव्येतुतेशक्रसंतापस्त्वमेवेंद्रोभविष्यसि ३१ नचाप्येवंत्वयाभूयः क्षेप्तव्याब्रह्मवादिनः नचावमान्या दर्पात्तेवाग्वज्राभृशकोपनाः ३२ एवमुक्तोजगामेंद्रोनिर्विशंकस्त्रिविष्टपं विनताचापिसिद्धार्थाबभूवमुदितातथा ३३ जनयामासपु त्रौद्वौअरुणंगरुडंतथा विकलांगोरुणस्तत्रभास्करस्यपुरः सरः ३४ पतत्रिणांचगरुडमिंद्रत्वेनाभ्यषिंचत। तस्यैतत्कर्मसुमहच्छ्रूयतांभृगु पं१ नंदन ३५ इत्यादिपर्वणिसौपर्णे २९

तिपाठेइंद्रत्वेनन्नपेणाभिषिक्तः हिरण्यगर्भेनेतिशेषः ३५ अध्याय २९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ततः तस्मिन्देवानीकेतथाविधेनानाप्रथाश्रुपेते समुदीर्णे संग्रामायोद्धुतेसति १ ततः तेषां प्रथमेतासिः २ भौमनः विश्वकर्मा ३ विनिहतोमृतकल्पः कृतः ४ ५ ६ लोडयामा

सौतिरु च ततस्तस्मिन्द्विजश्रेष्ठसमुदीर्णेतथाविधे। गरुत्मान्पक्षिराट्तूर्णंसंप्राप्तोविबुधान्प्रति १ तंदृष्ट्वातिबलंचैवप्राकंपंतसमंततः परस्परंचप्रत्यघ्नन्सर्वप्रहरणान्युत २ तत्रचासीदमेयात्माविद्युदग्निसमप्रभः भौमनः सुमहावीर्यः सोमस्यपरिरक्षिता ३ सतेनपतगेंद्रेणपक्षतुंडनखक्षतः मुहूर्तमतुलंयुद्धंकृत्वाविनिहतोयुधि ४ रजश्चोद्धूयसुमहत्पक्षवातेनखेचरः कृत्वालोकान्निरालोकांस्तेनदेवानवाकिरत् ५ तेनावकीर्णारजसादेवामोहमुपागमन् नैवैनंददृशुश्छन्नंरजसासोमरक्षिणः ६ एवंसंलोडयामासगरुडस्त्रिदिवालयं पक्षतुंडप्रहारैस्तुदेवान्सविददारह ७ ततोदेवः सहस्राक्षस्तूर्णंवायुमचोदयत् विक्षिपेमांरजोवृष्टिंतवेदंकर्ममारुत ८ अथवायुरपोवाहतद्रजस्तरसाबली ततोवितिमिरेजातेदेवाः शकुनिमर्दयन् ९ ननादोच्चैः सबलवान्महामेघरवोवि वध्यमानः सुरगणैः सर्वभूतानिभीषयन् उत्पपातमहावीर्यः पक्षिराट्परवीरहा १० समुत्पत्यांतरिक्षस्थंदेवानामुपरिस्थितं वर्मिणोविबुधाः सर्वेनानाशस्त्रैरवाकिरन् ११ पट्टिशैः परिघैः शूलैर्गदाभिश्चसवासवाः क्षुरप्रैर्ज्वलितैश्चापि चक्रैरादित्यरूपिभिः नानाशस्त्रविसर्गैस्तैर्वध्यमानः समंततः कुर्वन्सुतुमुलंयुद्धंपक्षिराट्नव्यकंपत १३ ॥

समाकुलीचकार ७ ८ अपोवाह अपसारितवान् ९ १० अंतरिक्षस्थंगरुडमितिशेषः ११ १२ १३ १३ १३ १३॥

याक्षिपत्विशेषेणाक्षिप्तवान् १४ १५ १६ १७ आश्वकंदादयो नव यक्षाः १९ २१ पक्षवातादेवउत्क्रांतजीवितान्नखड्गेनेत्याह २२ २३ नवतः नवतिः शताधिका
इसहस्त्रीनवती रीति बहुवचनात्तस्याप्यनेकगुणा ततश्चानेनैर्मुखे[illegible]रित्यर्थः डिः तामाजमात्वन्यार्थः २७ समास्तरत्आच्छादितवान् शमितवान् [illegible] अग्निमभिप्रशाम्य

लि ४

निर्दहन्निव चाकाशे वैनतेयः प्रतापवान पक्षाभ्यां पुरुषांश्चैव समंताद्विक्षिपन्रणे १४ ते विक्षिप्तास्ततो देवा दुद्रुवुर्गरुडार्दिताः नखतुंडक्षताश्चैव सस्रुवुः शोणितं बहु १५ साध्याः प्राचीं सगंधर्वा वसवो दक्षिणां दिशं प्रजग्मुः सहिता रुद्रैः पतगेंद्रप्रधर्षिताः १६ दिशं प्रतीचीमादित्या नासत्या उत्तरां दिशं मुहुर्मुहुः प्रेक्षमाणा युध्यमाना महौजसः १७ अश्वक्रंदेन वीरेण रेणुकेन च पक्षिणा क्रथनेन च शूरेण तपनेन च खेचरः १८ उलूकश्वसनाभ्यां च निमेषेण च पक्षिणा प्ररुजेन च संयाम[illegible] पुलिनेन च १९ तान्पक्षनखतुंडाग्रैरभिनद्विनतासुतः युगांतकाले संक्रुद्धः पिनाकीव परंतपः २० महाबला महोत्साहास्तेन ते बहुधा क्षताः रेजुरभ्रघनप्रख्या रुधिरौघप्रवर्षिणः २१ तान्कृत्वा पतगश्रेष्ठः सर्वानुत्क्रांतजीवितान् अतिक्रांतोऽमृतस्यार्थे सर्वतोऽग्निमपश्यत २२ आवृण्वानं महाज्वालमर्चिर्भिः सर्वतोंबरं दहंतमिव तीक्ष्णांशुं चंडवायुसमीरितं २३ ततो नवत्या नवतीर्मुखानां कृत्वा महात्मा गरुडस्तरस्वी नदीः समापीय मुखैस्ततस्तैः सुशीघ्रमागम्य पुनर्जवेन २४ ज्वलंतमग्निं तममित्रतापनः समास्तरत्पत्ररथो नदीभिः ततः प्रचक्रे वपुरन्यदल्पं प्रवेष्टुकामोऽग्निमभिप्रशाम्य २५ इत्यादिपर्वणि सौपर्णे ३०

वेष्टुकामः सोमसमीपमितिशेषः २५ अध्यायः ३० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

जांबूनदविवेशचक्रान्निसन्नरेणान्वयः १ चक्रं पंत्रं क्षुरपर्यंतं समंततः कंदवमुकुलवत् क्षुरसहस्रयुतं चक्रं हृद्गेन वंभ्रममाणं यत् प्रविष्टोमशको पिसहसघाच्छिद्यते यदिभ्रमंत मितिपुरलं मार्षं २ ३ अरा:
चक्रस्यनाभिनेम्योः संभेदकाष्टानितेषां मंतरेणमध्यतः अंगं हुंक्षिप्य अराउकं रछित्वा ४ ८ अंगे देहौ आछिनत् खंडशः कृतवान् ९ यंत्रमध्यमध्यमतं त्रमतलकुंभसमुत्साद्य उत्सपातेस

म १

सोतिसृ च जांबूनदमयोमुल्लामरीचिनिकरोनलः प्रविवेश व[illegible]लातस्ड्वी वारिवेगइवार्णवं १ सचक्रं क्षुरपर्यंतं पश्यदमृतांतिके परिभ्रमंतमनि
शंतीक्ष्णाधारमयस्मयं २ ज्वलनार्कप्रभं घोरं छेदनं सोमहारिणां घोररूपं तदस्यार्थं यंत्रं देवैः सुनिर्मितं ३ तस्यांतरं सदृष्टैव पर्यवर्तत खेचरः
अरांतरेणाभ्यपतत्संक्षिप्यांगं क्षणेन हि ४ अधश्चक्रस्य चैवात्र दीप्तानलसमद्युती विद्युज्जिह्वौ महावीर्यौ दीप्तास्यौ दीप्तलोचनौ ५ चक्षुर्वि
षौ महाघोरौ नित्यं क्रुद्धौ तरस्विनौ रक्षार्थमेवामृतस्य ददर्श भुजगोत्तमौ ६ सदा संरब्धनयनौ सदा चानिमिषेक्षणौ तयोरेकोपि यं पश्येत्स तू[^1]
र्णं भस्मसाद्भवेत् ७ तयोश्चक्षूंषि रजसा सुपर्णः सहसावृणोत् ताभ्यामदृष्टरूपोसौ सर्वतः समताडयत ८ तयोरंगे समाक्रम्य वैनतेयों
तरिक्षगः आच्छिनत्तरसा मध्ये सोमम भ्यद्रवत्ततः ९ समुत्पाट्यामृतं तत्तु वैनतेयस्ततो बली उत्पपात जवेनैव यंत्रमुन्मथ्य वीर्यवान् १०
अपीत्वा चामृतं पक्षी परिगृह्याशु निःसृतः आगच्छदपरिश्रांत आवार्यार्कप्रभां ततः ११ विष्णुना च तदाकाशे वैनतेयः समेयिवान् स

सं २ तस्य नारायणस्तुष्टस्तेनालौल्येन कर्मणा १२ ॥

[^1]: पं ४

न्वयः २० आचार्यवारयित्वातिरस्कृत्येत्यर्थः २० समेयिवान् संगतः अलौल्येन अमृतपानलोभराहित्येन ११ १२ १२ १२ ११ १२ १२

उपरिध्वजेस्थः १३ १७ साह्वीनिवस्त्रामुरन्तस्तहिति: वायुंजेतमिच्छन्निस्पर्धः १८ १९ आक्रांदे कलकले २० अयेः दधीचेः २१ पत्रंपक्षं २२ सुपर्णशब्दं निर्वक्ति

पृ २

तमुवाचाव्ययोदेवोवरदोस्मीतिखेचर सवव्रेतवतिष्ठेयमुपरीत्यंतरिक्षगः २३ उवाचचैनंभूयोपिनारायणमिदंवचः अजरश्चामरश्चस्या
ममृतेनविनाप्यहं २४ एवमस्त्वितितंविष्णुरुवाचविनतासुतं १५ प्रतिगृह्यवरौतौचगरुडोविष्णुमब्रवीत भवतेपिवरंदद्यांवृणोतभगवा
नपि २६ तंवव्रेवाहनंविष्णुर्गरुत्मंतंमहाबलं ध्वजंचचक्रेभगवानुपरिस्थास्यसीतितं २७ एवमस्त्वितितंदेवमुक्त्वानारायणंखगः वव्राजत
रसावेगाद्वायुंस्पर्द्धन्महाजवः १८ तंव्रजंतंखगश्रेष्ठंवज्रेणेंद्रोभ्यताडयत हरंतममृतंरोषाद्गरुडंपक्षिणांवरं १९ तमुवाचेंद्रमाक्रंदेगरुडःपत
तांवरः प्रहसन्श्लक्ष्णयावाचातथावज्रसमाहतः २० ऋषेर्मानंकरिष्यामिवज्रंयस्यास्थिसंभवं वज्रस्यचकरिष्यामितवैवशतक्रतोः २१ ए
तस्यैवत्रजाम्येकंयस्यांतंनोपलप्स्यसे नचवज्रनिपातेनरुजामेस्तीहकाचन २२ एवमुक्त्वाततःपत्रमुत्ससर्जसपक्षिराट् तदुत्सृष्टमभिप्रे
क्ष्यतस्यपर्णमनुत्तमं हृष्टानिसर्वभूतानिनामचक्रुर्गरुत्मतः सुरूपंपत्रमालक्ष्यसुपर्णोयंभवत्विति २४ तदृष्ट्वामहदाश्चर्यंसहस्राक्षःपु
रंदरः खगोमहदिदंभूतमितिमत्वाभ्यभाषत २५ शक्रउवाच बलंविज्ञातुमिच्छामियत्तेपरममुत्तमं सख्यंचानंतमिच्छामित्वयासहखगोत्त
म २६ इत्यादिपर्वणिसौपर्णे ३१ गरुडउवाच सख्यंमेस्तुत्वयादेवयथेच्छसिपुरंदर बलंतुममजानीहिमहच्चासह्यमेवच २ ॥ ॥

सन्तपमिते १३ १६ अध्यायः सर्वं १ १ १ १ १ १ १ १ १ १ १ १ १ १ १

कामं इच्छया। बलं शरीरसामर्थ्यं। गुणाः बुद्धिसामर्थ्यज्ञानौदार्यादिः २ निमित्ते रागभूसोऽत्र ते:ऽपरतस्त्वत्तस्त वोपिकर्तुं व्यइतिभावः ३ ४ सपिंडिता नष्टकीकृता नस्थाणुस्थावरं ५ किरीटिइंद्रः सर्वलोकहितः सर्वेभ्यो ५ मतंदातुमनिच्छुत्वात् ६ ७ नकार्यमितिविज्ञनाः मतं नापितवाः मत्वस्पदत्तत्वात् ८ किंचितकारणमात्रदीसविमोक्तुमिति भावः स

कामं नैतत्प्रशंसंति मंतः स्वबलं सत्त्वं गुणसंकीर्तनं चापि स्वयमेव शतक्रतो २ सखेति कृत्वा तु मया वैश्रेष्ठो वदनामहं त्वया नत्वात्मसंस्तव युक्तं वक्तुमनिमित्ततः ३ सपर्वतवनामुर्वीं ससागरजलामिमां वहेयं पक्षेणैवेश क्रत्वाम प्यत्रावलं विनं ४ सर्वान्सपिंडितां वापि लोकान्सस्थाणुजंगमान वहेयमपरिश्रांतो विद्धीदं मेमहद्बलं ५ सौतिरु च इत्युक्तवचवनं वीरं किरीटी श्रीमतां वरः आह शौनक देवेंद्रः सर्वलोकहितः प्रभुः ६ एवमेव यथात्थ त्वं सर्वं संभाव्यते त्वयि संगृह्यतामिदानीं मे सख्यमत्यंतमुत्तमं ७ न नकार्यं दि सोमेन मम सोमः प्रदीयतां॥ अस्मांस्ते हि प्रबाधेयुर्ये भ्योदद्याद्भवानिमं ८ गरुड उ च किंचित्कारणमुद्दिश्य सोमो यं नीयते मया न दास्यामि समादातुं सोमं कस्मैचिदप्यहं ९ यत्रेमं तु सहस्राक्ष निक्षिपेयमहं स्वयं त्वमादाय ततस्तूर्णं हरेथास्त्रिदिवेश्वर १० शक्र उ च वाक्येनानेन तुष्टोहं यत्त्वयोक्तमिहांडज यमिच्छसिवरं मत्तस्तं गृहाण खगोत्तम ११ सौतिरु च इत्युक्तः प्रत्युवाचेदं कद्रूपुत्राननुस्मरन स्मृत्वा चैवोपधिकृतं मातुर्दास्यनिमित्ततः १२ ईशो हमपि सर्वस्य करिष्यामि तु ते र्थितां भवेयुर्भुजगाः शक्र मम भक्ष्या महाबलाः १३

मादातुं पातुं ९ १० ११ उपधिकृतं छलकृत दास्यं मितत: निमित्ते इंद्राश्वस्यकृष्णकेशत्वेदास्यमिति पाठे निमित्ततः अस्त्र शाणपात १२ ईशः समर्थः अर्थितां अन्यस्मै अमतं नदेयमित्यर्थः स्वतां १३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तेगरुडंतथेत्युक्त्वाइंद्रोहरिरन्वगच्छत्त्वो। किंनिर्वाहार्थं चिंतितवान् २४ विनिक्षिप्तं त्वयेति शेषः अत्रभाष्ये गरुडेनेति संबोध्य २५ २६ इंद्रंवः पुष्पाकंनलमममकुशेषु निःक्षिप्ता
मित्युक्त्वेतिभावः १९ २० भवतांभवद्भिः २५ २१ प्रतिमायाकृतं। यथास्माभिः कपटेनगरुडस्मात्ददास्यकृतं तेनतथानेनापि अस्माभिः अमृतं दत्त मित्यर्थः २२ प

न३

तथेत्युक्त्वान्वगच्छत्ततोदानवसूदनः देवदेवंमहात्मानंयोगिनामीश्वरंहरिं सचान्वमोदत्तत्सर्वंयथोक्तंगरुडेनवै २४ इदंभूयोववचः
प्राहभगवांस्त्रिदशेश्वरः हरिष्यामिविनिक्षिप्तंसोममितनुभाषतं २५ आजगामततस्तूर्णंसुपर्णोमातुरंतिकं अथसर्पानुवाचेदंस
र्वान्परमहृष्टवत् २६ इदमानीतममृतंनिक्षेप्स्यामिकुशेषुवः स्नातामंगलसंयुक्तास्ततःप्राश्नीतपन्नगाः २७ भवद्भिरिदमासीनैर्यदुक्तं
तद्वचस्तदा अदासीचैवमातेयमद्यप्रभृतिचास्तुमे २८ यथोक्तंभवतामेतद्वचोमेप्रतिपादितः ततःस्नातुंगताःसर्पाःप्रत्युक्त्वातंत
थेत्युत शक्रोप्यमृतमाक्षिप्यजगामत्रिदिवंपुनः २० अथागतास्तमुद्देशंसर्पाःसोमार्थिनस्तदा स्नाताश्चकृतजप्याश्चप्रहृष्टाःकृतमंग
लाः २१ यत्रैतदमृतंचापिस्थापितंकुशसंस्तरे तद्विज्ञायहृतंसर्पाःप्रतिमायाकृतंचतत् २२ सोमस्थानमिदंचेतिदर्भांस्तेलिलिहुस्त
दा ततोद्विधाकृताजिह्वासर्पाणांतेनकर्मणा अभवंश्चामृतस्पर्शाद्दर्भास्तेथपवित्रिणः २३ एवंतदमृतंतेनहृतमाहृतमेवच द्विजिह्वा
श्चकृताःसर्पागरुडेनमहात्मना २४ ततःसुपर्णःपरमप्रहर्षवान्विहृत्यमात्रासहतत्रकानने ॥ ॥ ॥ ॥

वित्रममृतंतत्रेषुविघ्नेनेपवित्रिणः २३ हृतंदेवलोकात् आहृतंसर्पसमीपे २४ ॥ ॥ ॥

आ०
९०

पदंमहत्स्याद्गमिष्ठुनीचोनीचतरंव्रजेत्। अमृतत्वेश्च वीयातामुजगास्ता कर्मभक्षितां देविश्यावत्पाशांपंमातः सर्पाविपद्गताःस्वर्णाल्लभयःश्रीसाह्नोरण्युपरिस्थितः २६ अध्यायः
सौपर्णाख्यास्यासमाप्तः ३१ भुजं। भुजंगमानांमात्राशापोत्तस्मत्कारणांत्र्यवजयामातरज्ञाकारित्वं। विनतायाः स्तेनेनशापोदत्तः तस्मत्कारणांसपत्न्योर्ष्या १ २

शाक्री

भुजंगमभक्षः परमार्चितः खगेरहीनकीर्तिर्विनतामनंदपत २५ इमांकथांयः शृणुयान्नरः सदापठेतवाद्विजगणामुख्यसंसदि अमंशयंत्रि
दिवमियात्सपुण्यभाङ्महात्मनः पतगपतेः प्रकीर्त्तनात् २६ इत्यादिपर्वणिपास्तीकेसौपर्णोसमाप्तं २७ शौनकउ च भुजंगमानांशापस्य
मात्राचैवसुतेनच विनतायास्त्वयाप्रोक्तंकारणंसूतनंदन १ वरप्रदानंभर्त्राचकद्रुविनतयोस्तथा नामनीचैवतेप्रोक्तेपक्षिणोर्वैनतेय
योः २ पन्नगानांतुनामानिनकीर्तयसिसूतज प्राधान्येनापिनामानिश्रोतुमिच्छामहेवयं ३ सौतिरुच बहुत्वान्नामधेयानिप
न्नगानांतपोधन नकीर्तयिष्येसर्वेषांप्राधान्येनतुमेशृणु ४ शेषःप्रथमतोजातोवासुकिस्तदनंतरं ऐरावतस्तक्षकश्चकर्कोटकधनं
जयौ ५ कालीयोमणिनागश्चनागश्चापूरणस्तथा नागस्तथापिंजरकएलापत्रोऽथवामनः ६ नीलानीलौतथानागौकल्माषशब
लौतथा आर्यकश्चित्रकश्चैवनागःकलशपोतकः ७ सुनामुखोदधिमुखस्तथाविमलपिंडकः आसःकर्कोटकश्चैवशंखोवा
लिशिखस्तदा ८ निष्टानकोहेमगुहोनहुषःपिंगलस्तथा वाह्यकर्णोहस्तिपदस्तथामुद्गरपिंडकः ९ ॥ ॥ ॥

३ ४ ५ ६ ७ ८ ९ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥

एम०
९०

१८ १९ अध्यायः ३३ पित्राचार्यादिभ्यः पूज्यतमा पिमाता ऽ नतामिसंधिनी चेत्याज्ञैवेतिदर्शयितुं शेषाध्यायमारभते आख्याताः स्यादिनागतस्त्वनंतरं १ २ ३ ४

कंबलाश्वतरौ चापि नागः कालीयकस्तथा वृत्तसंवर्तकौ नागौ द्वौ च पद्माविति श्रुतौ २० नागः शंखनखश्चैव तथा कूष्मांडकोपरः क्षेमकश्च तथा नागो नागः पिंडारकस्तथा २१ करवीरः पुष्पदंष्ट्रो बिल्वको बिल्वपांडुकः मूषकादः शंखशि ः णः पूर्णभद्रो हरिद्रकः २२ अपराजितो ज्योतिकश्च पन्नगः श्रीवहस्तथा कौरव्यो धृतराष्ट्रश्च शंखपिंडश्च वीर्यवान् २३ विरजाश्च सुबाहुश्च शालिपिंडश्च वीर्यवान् हस्तिपिंडः पिठर कंसमुखः कौणपाशनः २४ कुठरः कुंजरश्चैव तथा नागः प्रभाकरः कुमुदः कुमुदाक्षश्च तित्तिरिर्हलिकस्तथा २५ कर्दमश्च महाभागो नागश्च बहुमूलकः कर्कराकर्करौ नागौ कुंडोदरमहोदरौ २६ एते प्राधान्यतो नागाः कीर्तिता द्विजसत्तम बहुत्वान्नामधेयानामितरे नानुकीर्तिताः २८ बहूनीह सहस्राणि प्रयुतान्यर्बुदानि च अशक्यानेव संख्यातुं पन्नगानां तपोधन २९ इत्यादिपर्वणि पौलोमीके। शौनक उ च आख्याता भुजगास्तात वीर्यवंतो दुरासदाः शापं तं तेऽभिविज्ञाय कृतवंतः किमुत्तरं १ सूत उ च तेषां तु भगवाञ्छेषः कद्रूं त्यक्त्वा महायशाः उग्रं तपः समातस्थे वायुभक्षो यतव्रतः २ गंधमादनमासाद्य बदर्यां च तपोरतः गोकर्णे पुष्करारण्ये तथा हिमवतस्तटे ३ तेषु तेषु च पुण्येषु तीर्थेष्वायतनेषु च एकांतशीली नियतः सततं विजितेंद्रियः ४

११११११ ११११११ ११११११ ११११११॥ ११११११

आ० ८१

स्तपः शिराः ५ ६ दमेनवास्येंद्रियदमेनचक्षयेनचेतिपाठेक्षमयोविनयः १७ ॥ ॥ ॥ ॥ ॥ ॥

तप्यमानंतपोघोरंतंददर्शपितामहः संशुष्कमांसत्वक्स्नायुंजटाचीरधरंमुनि ५ तमब्रवीत्सत्यधृतिंतप्यमानंपितामहः किमिदंकुरुषेशेष प्रजानांस्वस्तिवैकुरु ६ त्वंहितीव्रेणतपसाप्रजास्तापयसेऽनघ ब्रूहिकामंचमेशेषयत्तेहृदिव्यवस्थितः ७ शेषउ॰ सोदर्याममसर्वेहि भ्रातरोमंदचेतसः सहतैर्नोत्सहेवस्तुंतद्भवाननुमन्यतां ८ अभ्यसूयंतिसततंपरस्परममित्रवत् ततोहंतपआतिष्ठेनैतान्पश्येयमित्युत ९ न मर्षयंतिसततंससुतांविनतांचते अस्माकंचापरोभ्रातावैनतेयोंतरिक्षगः १० तंचद्विषंतिसततंसचापिबलवत्तरः वरप्रदानात्सपि तुः कश्यपस्यमहात्मनः ११ सोहंतपः समास्थायमोक्ष्यामीदंकलेवरं कथंमेप्रेत्यभावेपिनतैः स्यात्सहसंगमः तमेवंवादिनंशेषंपितामहउवाचह जानामिशेषसर्वेषांभ्रातॄणांतेविचेष्टितं १२ मातुश्चाप्यपराधाद्वैभ्रातॄणांतेमहद्भयं कृतोत्रपरिहारश्चपूर्वमेवभुजंगम भ्रातॄणांतवसर्वेषांनशोकंकर्तुमर्हसि वृणीष्वचवरंमत्तः शेषयत्तेभिकांक्षितं दास्यामिहिवरंतेद्यप्रीतिर्मेपरमात्वयि दिष्ट्याबुद्धिश्चतेधर्मेनिविष्टापन्नगोत्तम भूयोभूयश्चतेबुद्धिर्धर्मेभवतुसुस्थिरा १६ शेषउ॰ एषएववरोदेवकांक्षितोमेपितामह धर्मेमेरमतांबुद्धिःशमेतपसिचेश्वर १७ ब्रह्मो॰ प्रीतोस्म्यनेनतेशेषदमेनचशमेनच त्वयात्विदंवचः कार्यमन्नियोगात्प्रजाहितं १८ ॥ ॥८७

श्री श्री श्री श्री श्री ॥